# सरलमानकसंस्कृतस्वरूपादिनिर्धारणसमितेः

# प्रतिवेदनम्

(या च समितिः दैनन्दिनव्यवहारे, शिक्षणे, वार्तामाध्यमेषु,

मनोरञ्जने, अन्तर्जाले, संस्कृतसम्बद्धसंस्थानां प्रशासने, संस्कृतपत्रकारितायाम्,

एवम् अन्येषु तत्सम्बद्धेषु विषयेषु च उपयोक्तुम् अर्हस्य

सरलमानकसंस्कृतस्वरूपस्य निर्धारणाय राष्ट्रियसंस्कृतपरिषदा रचिता)

# Report of the committee

Constituted by

## Rashtriya Samskrit Parishad

For suggesting ways and means of defining

Simple Standard Sanskrit (SSS)

For the specific purpose of using it as the medium of general

communication, teaching, news, entertainment, internet,

Administration of Sanskrit institutions,

Sanskrit journalism etc.

# अनुक्रमणिका

**प्रथमः अध्यायः**

**१. किमर्थं सरलं मानकं संस्कृतम्**

१.१. प्रस्तावना

१.२. प्रसिद्धानां भाषाणां स्थितिः

१.३. संस्कृतभाषायाः स्थितिः

१.४. सरलं संस्कृतम्

१.५. सरलं संस्कृतं, सरलीकृतं न

१.६. मानकं संस्कृतम्

१.७. भाषायाः व्यवहारे सरलतायाः आवश्यकता

१.७.१.१. लोकव्यवहाराः

१.७.१.२. शिक्षणे माध्यमम्

१.७.२.१. प्रसारः

१.७.२.२ पाठ्यपुस्तकनिर्माणम्

१.७.२.३. संस्कृतभाषानुवादः

१.७.२.४. साहित्यसमृद्धिः

१.८ मनीषिणां समर्थनम्

**द्वितीयः अध्यायः**

**२. सरलमानकसंस्कृतस्य स्वरूपम्**

२.१. प्रस्तावना

२.२. सरलतानिर्णायकः मानदण्डः

२.३. सरलमानकसंस्कृतस्य सामान्यनियमाः

२.३.१. परमप्राथमिकः स्तरः

२.३.१.१. अजन्तशब्दानाम् एव प्रयोगः

२.३.१.२. पर्यायशब्दानां प्रयोगे चिन्तनम्

२.३.१.३. युष्मदर्थे भवच्छब्दस्य प्रयोगः

२.३.१.४. एकवचन-बहुवचनयोः प्रयोगः

२.३.१.५. विभक्तिविषये सारल्यम्

२.३.१.६. भूलकालार्थे कृदन्तप्रयोगः

२.३.१.७. चत्वारः एव लकाराः

२.३.१.८. चितानां धातूनाम् एव प्रयोगः

२.३.२ अल्पप्रगतस्तरः

२.३.३. प्रगतस्तरः

२.३.४.१. लघूनां वाक्यानां प्रयोगः

२.३.४.२. सन्ध्यादिविषये व्यवस्था

२.३.४.३. कर्तरिप्रयोगस्य आधिक्येन उपयोगः

२.३.४.४. अन्वयानुसारेण वाक्यप्रयोग:

२.३.४.५. प्रयोग:

२.३.४.६. समास:

२.३.४.७. विमति: निराधारा

२.३.४.८. प्राचीनसाहित्यस्य न हानि:

२.४. संज्ञापदेषु विभक्तियोजनम्

२.४.१. अव्युत्पन्नानां संज्ञाशब्दानां विभक्तियोजनम्

२.४.२. संज्ञाशब्दानां प्रयोगप्रकार:

२.४.३. 'प्रोफेसरस्य' इत्यदय: असाधवः

२.४.४. आदरार्थे बहुवचनप्रयोग:

**तृतीयः अध्यायः**

**३. सरलमानकसंस्कृतस्य क्रियान्वयनम्**

३.१. क्रियान्वयनाय क्षेत्राणि

३.१.१. भाषितॄणां जनानां मध्ये…

३.१.२. शिक्षण-प्रशासन-मनोरञ्जन-सम्पर्क-विज्ञान-वाणिज्य-सूचनादीनां माध्यमरूपेण

३.१.३. अनुवादावसरे (इतरभाषात: संस्कृतं प्रति)

३.१.४. संस्कृतेन एव समकालिकसाहित्यस्य निर्माणावसरे

३.१.५. शब्दनिर्माणस्य निरन्तरतावसरे

३.१.६. तन्त्रज्ञानस्य स्वीकृतिविषये (Technology Adaptation)

३.३.७. जालपुटव्यवस्थाया: (Internet) अभ्युपगमस्य विषये

३.२. क्रियान्वयनाय केचन उपायाः

# सरलमानकसंस्कृतम्

## प्रथमः अध्यायः

## १. किमर्थं सरलं मानकं च संस्कृतम्

यदि संस्कृतं सामान्यानां जनानां दैनन्दिनजीवनात् पृथक्क्रियेत तर्हि तेषां जीवनस्य प्रकाशः एव विलुप्तः स्यात्। ये विशिष्टाः गुणाः भारतीयसंस्कृतिं विश्वचिन्तने प्रतिष्ठापितवन्तः तेषाम् उपरि दुष्प्रभावः भवेत्, येन भारतस्य, विश्वस्य च महती क्षतिः स्यात्। **- सर् मिर्जा इस्माईल्**

जनाः न जानन्ति यत् संस्कृतं कियता प्रमाणेन तेषां मस्तिष्कं प्रभावितवत् स्यात् इति। संस्कृतसाहित्यं राष्ट्रियं स्यात् चेदपि तस्य उद्देशः तु सार्वभौमिकः अस्ति। एतस्मात् एव कारणात्, ये कस्याश्चित् संस्कृतेः अनुयायिनः न स्युः तेषाम् अपि अवधानम् आकर्षति एषा भाषा। **- डा. एस्. राधाकृष्णन्**

### १.१ प्रस्तावना

आ प्राचीनकालात् भारतीयसंस्कृति: अविच्छिन्नतया प्रवहन्ती भारतीयं समाजं समृद्धं कृतवती अस्ति। तस्या: संस्कृते: प्रमुखा वाहिका अस्ति संस्कृतभाषा। अत: एव अद्यापि यदा संस्कृते: प्रस्ताव: भवति तदा ऐदम्प्राथम्येन उपादीयते संस्कृतम् इति नाम। संस्कारदानमपि शिक्षणस्य प्रमुखं लक्ष्यं भवति इत्यत: सहजतया शिक्षणक्षेत्रे अपि संस्कृतस्य स्थानम् अतिविशिष्टम् अस्ति एव।

समग्रस्य शिक्षणक्षेत्रस्य परिशीलनात् स्पष्टं भवति यत् सर्वेषु अपि कालेषु संस्कृतक्षेत्रे पाठ्यवस्तु भाषास्वरूपं च समानं न आसीत् इति। सूत्रकारादीनां काले सूत्राणि कारिकादीनि च गुरुभि: बोध्यन्ते स्म व्याख्यानावलम्बनं विना एव। गुरो: बोधनात् एव शिष्यै: सूत्रादीनाम् आशय: अवगम्यते स्म। अग्रिमे काले व्याख्यानानि आगतानि। व्याख्यानानां द्वारा सूत्रादीनाम् आशयस्य अवगमनम् आरब्धम्। ततः व्याख्यानानां व्याख्या: अपि आगता:। मूलग्रन्थानां सारस्य सङ्ग्रहाय अपि प्रयास: आरब्ध:। शास्त्रप्रवेशात् पूर्वं सामान्यभाषापरिचायनाय प्रयासा: अपि आरब्धा:। आधुनिके काले तु संस्कृतपरिचयप्रदानमात्रमपि आरब्धम्। एवं कालानुगुण्येन संस्कृतशिक्षणक्षेत्रे अनेकविधानि परिवर्तनानि जातानि। तेनैव सह बोधनाय उपयुज्यमानाया: भाषाया: स्वरूपे अपि परिवर्तनानि जातानि।

संस्कृतं भारतीयतत्त्वज्ञानस्य आधारभूता भाषा अस्ति। एषः आधारः यथा विषयाणाम् अवगतये ग्राहकताम् आदधाति तथा स्वस्य विषये तन्नाम संस्कृतभाषाविषये ग्राह्यताम् अपि पोषयति। अतः एव भारतीयमनीषायाः सर्वविधा अभिव्यक्तिः अनया भाषया एव अभूत्। किं च तत्तेषां शास्त्राणाम् अध्ययनाध्यापनविधिः अपि संस्कृतभाषामुखेन एव प्रचलितः आसीत् इति प्रायः प्रमाणितमिदं तथ्यम्। स च शास्त्रकाव्यादिगतविषयाणां सम्प्रेषणविधिः सरलया संस्कृतभाषया एव आसीत्। 'एषा भाषा दुरूहा क्लिष्टा च, केवलैः प्रौढमतिभिः विद्वद्भिरेव ग्राह्या' इति प्रचारं विधाय आङ्ग्लशासकैः संस्कृतभाषा लोकव्यवहारतः न केवलं दूरं गमिता, अपि तु 'एतस्याः प्रयोगे कृते पश्चाद्भाविता आगमिष्यति, एतद्भाषया निबद्धेषु ग्रन्थेषु न किमपि तत्त्वं, न च किमपि तथ्यम्' इत्यादयः भ्रान्तयः अपि जनमनसि आरोपिताः। अतः तस्मिन् काले विद्वद्भिः स्वप्रयत्नेन निष्ठया च शास्त्रसंरक्षणविधौ प्रवर्तमानैः सद्भिरपि एषा भाषा क्रमशः उपेक्षाभूमौ पातिता अभवत्।

## १.२ प्रसिद्धानां भाषाणां स्थितिः दृष्टिश्च

विश्वस्मिन् प्रसिद्धानां व्यापकानां च भाषाणां प्रसिद्धेः व्याप्तेश्च कारणानि अनुध्यायामश्चेद् वयं साक्षात् पश्यामः यत् तासां कृते भाषाप्रयोगस्य एकमपि क्षेत्रम् अस्पृष्टं नास्ति इति । आङ्ग्लभाषाम् एव पश्यत । कलासाहित्यतः आरभ्य गणित-भौतिकशास्त्रादिविज्ञानं यावत्, महाकाशविज्ञानतः आरभ्य आयुर्विज्ञान-कृषि-वाणिज्यादिकं यावत्, ज्ञानविज्ञानयोः सर्वासु विधासु आङ्ग्लभाषा भावसंप्रेषिका विद्यते । एवमेव चीन-जापान-जर्मन्-फ्रेंच्-प्रभृतीनां भाषाणां प्रयोगक्षेत्रम् अपि विमृष्टुं शक्नुमः वयम् । एतया दृष्ट्या भारतीयभाषाः पश्यामश्चेत् स्वतन्त्रतायाः अनन्तरं हिन्दी-तमिलादिभाषासु एकस्याः अपि तादृशी व्यापकता आगता नास्ति । किन्तु व्यवहारदृष्ट्या हिन्दी-ओडिआ-बंगला-तमिल-तेलगु-प्रभृतयः भाषाः सर्वकारीय-कार्यालयकार्येषु, विद्यालय-महाविद्यालयाद्यध्ययनकेन्द्रेषु, कृषि वाणिज्यादिक्षेत्रेषु, रुग्णालय-न्यायालयादिसर्वसाधारणस्थलेषु च माध्यमभाषारूपेण व्यवहारपथम् आगताः सन्ति एव ।

## १.३ संस्कृतभाषायाः स्थितिः

संस्कृतभाषायाः स्थितिं पश्यामः चेद् ज्ञायते यत् इयं भाषा यद्यपि अन्यभारतीयभाषाः इव आधुनिकयुगं प्रविष्टवती, तथापि प्रयोगव्याप्तेः दृष्ट्या इदानीमपि हिन्दी-ओडिआ-बंगला-तमिल-तेलूगु-आदीतरभाषामुखेनैव आत्मप्रकाशनं कुर्वती अस्ति इति । अर्थात् इयमेव एका भाषा या भाषाशिक्षणप्रसङ्गे व्याकरणानुवादद्वारा इतरभाषामाध्यमेन शिक्ष्यते, किञ्च संस्कृतवाङ्मयं हिन्द्यादिभाषानुवादमुखेन पठ्यते, पाठ्यते, अवगम्यते च । अतः एव भारतवर्षे संस्कृतशिक्षणसंस्थासु संस्कृतमयः परिवेशः (यत्र अध्ययनम् अध्यापनं विचारविमर्शः शोधकार्याणि च संस्कृतमुखेन स्युः) विरलमेव परिलक्ष्यते । संस्कृतभाषा स्वप्राणैः न श्वसिति, स्वनिद्रया न स्वपिति, न च स्वनेत्रोन्मीलितैः जागर्ति । सर्वविधाभिप्रायसंप्रेषणे स्वयं पूर्णतः समर्था अपि इयं सर्वदा अन्यभाषामाध्यमम् आश्रित्य वैकल्यं भजते । स्वतन्त्रतायाः अनन्तरं सप्तत्यधिकवर्षावधौ अतीतेऽपि एतस्याः स्थितौ अन्यभारतीयभाषातुलनया उत्साहप्रदा प्रगतिः नैव आगतास्ति । तत्र संस्कृतभाषायाः स्वभावः स्वरूपं वा कारणं न, अपि तु तस्याः व्यवहारे प्रयोगे वा अपेक्षितायाः चेष्टायाः उद्यमस्य वा न्यूनता एव कारणम् । तादृश्यां न्यूनतायां च 'संस्कृतं कठिनम्' इति आङ्ग्लशासनकालाद् अद्यावधि प्रचारिता अपख्यातिः, 'प्रौढसंस्कृतप्रयोगः एव संस्कृतस्य गौरवाय' इति संस्कृतप्रयोगक्षेत्रे अस्मदीया मानसिकी अवधारणा, तया अवधारणया जातः प्रौढः जटिलश्च संस्कृतप्रयोगः च कारणभूतः अस्ति । 'संस्कृतं कठिनम्' इति प्रचारं कुर्वाणाः कतिपयान् क्लिष्टप्रयोगान् पुरतः प्रदर्श्य सम्पूर्णा संस्कृतभाषा आपादमस्तकं तथैव अस्तीति उपस्थापयन्तः प्रवर्तन्ते । स्वदेशे विदेशेषु च तादृशी अवधारणा 'महाजनो येन गतः स पन्थाः' इति लोकोक्त्या महाजनः इव सामान्यजनानां पन्थानं निश्चिनोति । स च पन्थाः अतीव दुरूहः विद्वज्जनमात्रगम्यः इति प्रथनकारणेन संस्कृतं जनव्यवहारतः अपसृतम्, अध्ययनाध्यापनादिमाध्यमप्रसङ्गतः दूरे स्थापितं च । केवलम् एषा अलङ्करणस्य, कर्मकाण्डस्य च भाषा अस्तीति गणबोधः एतस्याः सरलसहज-स्वरूपप्रकाशनम् अवरुणद्धि । एतम् अवरोधम् अपाकर्तुं धैर्यस्थैर्ययुतः जातिवर्णसम्प्रदायनिर्विशेषेण सर्वव्यापकः कार्यक्रमः स्वीकरणीयः ।

## १.४. सरलं संस्कृतम्

सामान्या: जना: विशेषक्लेशं विना यत् वस्तु प्राप्तुं न अर्हन्ति तत् दुर्लभत्वेन निर्दिश्यते । अत्र वस्तुन: महार्घता न कारणम् । अल्पार्घमपि वस्तु दुर्लभत्वेन परिगणितं भवितुम् अर्हति । भाषाक्षेत्रे तु या दुर्लभा स्यात् तस्यां 'काठिन्यम्' आरोप्यते । संस्कृतं कठिनम् इति भाव: अद्य लोके यदि स्यात् तर्हि तत्र कारणं - सा सामान्यैः जनै:

प्राप्यमाणा नास्ति इत्येव । अत: संस्कृतसम्बद्धस्य कठिनताभावस्य निवारणार्थं स्थित: एक: एव उपाय: - सरलताया: प्रदर्शनम् । 'संस्कृतं सरलम्' इति भाषणशतेनापि न किमपि प्रयोजनम् । यदि सरलतामुखं दर्श्येत तर्हि सहजतया 'संस्कृतं सरलम्' इति भाव: जागरित: स्यात् । यदि अयं भाव: सर्वत्र भवेत् तर्हि संस्कृतक्षेत्रे महत् परिवर्तनमेव स्यात् ।

यदि शिक्षणक्षेत्रे सरलसंस्कृतस्य अन्वय: स्यात् तर्हि कोटिश: छात्रा: उपकृता: भवेयु: । स्वीयान् भावान् संस्कृतेन अभिव्यञ्जयितुं समर्थानां तेषाम् आत्मविश्वास: वर्धेत । अद्य शिक्षणक्षेत्रे सरलसंस्कृतस्य अभावः दृश्यते इत्यतः छात्रेषु आत्मविश्वास: न दृश्यते । कानिचन वर्षाणि संस्कृतम् अधीत्य अपि संस्कृतेन भावाभिव्यञ्जने असमर्थाः ते आत्मग्लानिम् अनुभवन्ति । यदि पाठ्यपुस्तकानि सरलसंस्कृतेन भवेयुः, यदि च बोधनं सरलसंस्कृतेन स्यात् तर्हि संस्कृतं पठतां सङ्ख्यायामपि महती वृद्धिः भवेत् ।

सर्वे जना: विद्यालयशिक्षणे संस्कृतं पठितुम् अवसरं न प्राप्नुवन्ति । ये तादृशम् अवसरं प्राप्तवन्त: स्यु: तेऽपि अल्पा: एव । तेन अध्ययनेन न सन्तुष्टा: भवन्ति ते । अत: तेऽपि उद्योगादिप्राप्ते: अनन्तरं संस्कृतं पठितुम् इच्छन्ति । एवं संस्कृतं पठितुम् इच्छतां प्रौढानां सङ्ख्या अपि न अल्पा । एते यदि सरलसंस्कृतद्वारा संस्कृताध्ययनाय अवसरं प्राप्नुयु: तर्हि अपि संस्कृतक्षेत्रे अनितरसाधारणं परिवर्तनं सम्भवेत् ।

संस्कृताभिमानिनां सङ्ख्या अपारा । तेऽपि असकृत् संस्कृतं श्रोतुम् इच्छन्ति । तादृशा: (संस्कृतानभिज्ञा:) अपि यथा अवगच्छेयु: तथा भाषणानि सरलसंस्कृतेन यदि प्रवर्तेरन् तर्हि अपि महत् परिवर्तनं जायेत । एवमेव वार्ताप्रसारणम्, नाटकादीनां प्रदर्शनम् इत्यादिकं सरलसंस्कृतेन यदि प्रवर्तेत तर्हि जायमान: परिणाम: अपि अनूह्यः एव स्यात् ।

ये संस्कृतस्य सामान्यं परिचयं प्राप्तवन्त: स्यु: ते स्वस्तरानुगुणं पठनसाहित्यम् इच्छन्ति । अत: संस्कृतपत्रिकासु प्रयुज्यमाना भाषा सरला स्यात् । कथापुस्तकेषु (उपन्यासेषु, लघुकथासु, अनूदितकथाग्रन्थादिषु इत्येवम् ...) भाषा सरला स्यात् । एतादृशस्य साहित्यस्य प्रभाव: अपि अपूर्व: एव ।

संस्कृताभिमानिन: सर्वेऽपि संस्कृतेन स्वाभिप्रायं प्रकाशयितुम् इच्छन्ति । सरलसंस्कृतस्य परिचय: यदि तेषां स्यात् तर्हि तेऽपि अल्पेन एव परिश्रमेण स्वाभिप्रायं संस्कृतेन प्रकाश्य आत्मतृप्तिं प्राप्नुयु:, संस्कृतस्य समाराधका: भवेयु: ।

'संस्कृतं मम' इति कथयतां सङ्ख्या अद्यापि अत्यल्पा एव । सरलसंस्कृतप्रचारद्वारा यदि वयं महता प्रमाणेन सामान्यान् जनान् शिक्षयेम, तर्हि संस्कृते ममत्वं वहतां सङ्ख्या अपारा स्यात् । एतादृशा: ममत्ववाहका: जना: प्राशासनिकक्षेत्रे, उद्यमक्षेत्रे, वाणिज्यक्षेत्रे, विज्ञानक्षेत्रे, राजनीतिक्षेत्रे, अन्येषु प्रमुखक्षेत्रेषु च यदि भवेयु: तर्हि संस्कृतस्य आनुकूल्यं सिद्ध्येत् सहजतया । तदा संस्कृतस्य विरोध:, पाठ्यक्रमात् संस्कृतस्य अपसारणं, संस्कृतस्य उपेक्षा इत्यादय: समस्या: स्वयमेव विलीना: भवेयु: ।

'संस्कृतं द्वितीयराजभाषा स्यात्' इति केचन प्रयासम् अकुर्वन् । बहव: संस्कृतसम्बद्धा: कार्यालया: स्वीयेषु सर्वेषु व्यवहारेषु संस्कृतम् आनेतुम् इच्छन्ति । अत्र सर्वत्र आदेशमात्रदानेन न किमपि प्रयोजनम् । सरलसंस्कृतस्य शिक्षणं,

सरलतया भावाविष्काराय नियमानां रचनं च यदि क्रियेत तर्हि एव एतादृशेषु क्षेत्रेषु संस्कृतस्य उपयोगस्य आरम्भः भवेत् ।

संस्कृतविषये प्राधान्येन त्रयः आक्षेपाः सन्ति – १. एषा जीवन्ती भाषा न २. एषा कठिना ३. एषा जातिविशेषस्य भाषा चेति । सरलसंस्कृतस्य व्यापकप्रचारतः एतान् त्रीन् अपि आक्षेपान् अपसारयितुम् अर्हामः वयम् । जातिमतभेदं विना, उच्चनीचभेदं विना च व्यापकतया संस्कृतं पाठनीयं चेत् तस्य सरलं स्वरूपमेव अनन्यशरणम् अस्माकम् ।

एवं सरलसंस्कृतस्य महती आवश्यकता अस्ति संस्कृतक्षेत्रे । एतस्य परिणामः अपि सुमहान् ।

## १.५ सरलं संस्कृतम्, सरलीकृतं न

अत्र अवधेयं यत् 'सरलं संस्कृतम्' इति यत् उच्यते तत् 'सरलीकृतात् संस्कृतात्' सर्वथा भिन्नम् एव इति । 'सरलं संस्कृतम्' इत्येतत् संस्कृते विद्यमानम् एव किञ्चन मुखं निरूपयति । 'सरलीकृतम्' इति पदं तु अभूततद्भावार्थं प्रतिपादयति (अभूततद्भावे च्विः) । 'पूर्वं यत् न आसीत् तत् इदानीं प्रयत्नेन कृतम्' इति तस्य अर्थः । अतः 'पूर्वं संस्कृतं सरलं न आसीत्, तत् इदानीं प्रयत्नेन सरलं क्रियमाणम् अस्ति' इति तस्य तात्पर्यं सिद्धं भवति । 'प्रौढं कठिनं वा संस्कृतमेव "संस्कृतम्" इत्यतः तत् सरलं कृत्वा व्यवहारपथे आनेतुं योग्यम्' इति अनिष्टः कश्चिद् भावः इतः आगच्छति । सः अत्र सर्वथा न अभिप्रेतः ननु !! 'सरलं संस्कृतम्' इत्यनेन एषः बोधः मनसि निर्धारणीयः यत् अपराः व्यवहारभाषाः हिन्दी-गुजराती-तमिलादिभाषाः इव संस्कृतम् अपि वस्तुतः सरलम् अस्ति, केवलं व्यवहारतः कथमपि तत् दूरं गतम् इति कारणेन तस्य सरलरूपस्य स्वीकारः अपि लोकप्रयोगाद् दूरं गतः अस्ति इति । उपर्युक्तानां भाषाणाम् इव संस्कृतभाषायाः अपि 'प्रौढं सरलं च' इति रूपद्वयम् अस्ति । भाषाबोधस्य प्रथमस्तरे सरलं संस्कृतम् उपयुज्य अभिव्यक्तिकौशलं सम्पादनीयम् । ततः क्रमशः योग्यताविस्तारणपूर्वकं प्रौढं संस्कृतम् आत्मसात् कर्तुं शक्यम् । अतः 'सरलीकरण'नाम्ना संस्कृतस्य विकृततासम्पादनं सर्वथा अनुचितम् एव । 'संस्कृतं मूलतः कठिनं, तत्र यत्नेन सरलता आपादनीया' इति भावं मनसि निधाय '<u>सिगारेटं</u> पिबति', '<u>स्कूलं</u> गच्छति' इत्यादयः च्युतसंस्काराः अपप्रयोगाः न करणीयाः । तादृशाः प्रयोगाः यदि क्रियेरन् तर्हि संस्कृतस्य मूलस्वरूपमेव नश्येत् । अतः संस्कृतस्य यत् सरलं मानकं च रूपं तदेव अग्रे सारणीयम् ।

## १.६ मानकं संस्कृतम्

'सरलं मानकं च संस्कृतं प्रयोक्तव्यम्' इत्यत्र 'मानकम्' इति पदेन -

- पाणिनीयपद्धत्या सम्मतमेव संस्कृतं मानकम् इति स्वीकरणीयम् । तेन 'कृपया' इत्यस्य स्थाने 'कृप्या' इति, 'आशीर्वाद' इत्यस्य स्थाने 'आर्शीवाद' इति च न प्रयोक्तव्यम् । एवमेव 'षष्ठमः' इत्यादयः अपपाठाः अपि परिहरणीयाः ।
- एतद् मानकं संस्कृतं यथाशक्ति अखिलभारतीयस्तरे सर्वत्र समानायाः अवगमनयोग्यतायाः पालकं भविष्यति । अतः एकस्य वस्तुनः निर्देशाय अनेकेषु पदेषु सत्सु, किमपि एकमेव पदं स्वीकरणीयं, यच्च समग्रे अपि भारते समानम् अर्थं दद्यात् ।
- मानकसंस्कृते प्रादेशिकभाषायाः अनपेक्षितः प्रभावः न भविष्यति । तद् यथा - 'सौन्दर्यीकरणम्', 'बाजारीकरणम्' इत्यादयः अपपाठाः मानकसंस्कृते न भविष्यन्ति ।

किमर्थं सरलं मानकं च संस्कृतम् इति जनमनसि प्रश्नः उदियाद् एव । संस्कृतग्रन्थानां काव्यानां शास्त्राणां काव्य-नाटकादीनां च तासु तासु प्रान्तीयभाषासु आङ्ग्लादिवैदेशिकभाषासु अनुवादेषु च उपलभ्यमानेषु आधुनिककाले सरलसंस्कृतेन ग्रन्थलेखन-पठन-पाठनादीनां का प्रासङ्गिकता इति प्रश्नः उत्थाप्यते चेत् किम् उत्तरं स्यात् ?

**१.७ भाषायाः व्यवहारे सरलतायाः आवश्यकता**

कस्याश्चिदपि भाषायाः प्रयोगे सारल्यस्य प्रयोजनानि प्रायः इत्थम्भूतानि भवन्ति-

**१.७.१ मुख्यं प्रयोजनम् -**

१.१ लोकव्यवहारः

१.२ शिक्षणे माध्यमम्

**१.७.२ गौणं प्रयोजनम् -**

२.१ प्रसारः

२.२ पाठ्यपुस्तकनिर्माणम्

२.३ भाषानुवादः

२.४ साहित्यसमृद्धिः

संस्कृतभाषा गणतन्त्रभारतस्य संविधानस्य अष्टम्याम् अनुसूच्यां विधिवद् अन्तर्भूता अस्तीत्यतः इतरासां भारतीयभाषाणाम् इव अस्याः अपि एतानि प्रयोजनानि सन्त्येव ।

**१.७.१.१ लोकव्यवहारः**

लोके सरलतया शुद्धतया च संस्कृतभाषायाः व्यवहारेण संस्कृतविषये जनानां 'संस्कृतं कठिनम्' इति भ्रान्तिः अपगन्तुम् अर्हति । तदर्थं केचन परिमिताः शब्दाः, परिमिताः क्रियाः (त्रिषु कालेषु), परिमितानि कानिचन वाक्यानि च चित्वा तैः परस्परं भावविनिगमकरूपेण संस्कृतस्य सामान्यः व्यवहारः प्रारब्धव्यः । अत्रेदं ज्ञातव्यं यत् आङ्ग्लाः भारतवर्षे आङ्ग्लभाषायाः प्रचारं यदा आरब्धवन्तः तदवसरे (१९३० तमवर्षसम्बद्धे दशके) केवलानाम् आष्टशतशब्दानां प्रयोगेण आङ्ग्लभाषया सहजतया व्यवहर्तुं शक्यते इति जनमनसि एतस्याः वैदेशिकभाषायाः सुखबोध्यतां सारल्यं च प्रदर्शितवन्तः आसन् । संस्कृतं तु अस्माकं देशस्य मौलिकी भाषा । विविधेषु प्रान्तेषु साक्षात् संस्कृतशब्दाः ('तत्सम'पदवाच्याः), संस्कृताद् उत्पन्नाः ('तद्भव'पदवाच्याः) च शब्दाः प्रायः ७०-७५% सन्ति एव । न केवलं तत्, प्रान्तीयभाषासु क्रियाः वाक्यसंरचनाविधयः इत्यादयः अपि संस्कृततुल्याः एव । एतत् सादृश्यम् आश्रित्य संस्कृतं केन विधिना लोके अविभजनीयसम्बन्धेन अनुस्यूतम् अस्ति इति प्रदर्श्य सरलतया लोके संस्कृतव्यवहारकौशलं वर्धयितुं शक्यते । तेन 'अहमपि संस्कृतभाषाव्यवहारे क्षमः, एषा भाषा न कठिना, अपि तु मम प्रान्तीयमातृभाषा इव सरला' इति बोधः प्रसरिष्यति । एतेन संस्कृतम् अन्यभारतीयभाषावत् जीवद्भाषा इति संस्कृतभाषास्वीकारप्रवृत्तिरूपा मानसिकता स्थायिरूपतां प्राप्स्यति, येन 'संस्कृतं संस्कृतेन' इति लक्ष्यसिद्धौ मार्गः सुगमः भविष्यति ।

**१.७.१.२ शिक्षणे माध्यमम्**

संस्कृतभाषाशिक्षणे एतावत्पर्यन्तं व्याकरणानुवादपद्धतेः प्रयोगः भवति स्म । एषा पद्धतिः भाषाशिक्षणाय उपयुक्ता न इति इदानीं सर्वेषां मतं विद्यते । केवलं संस्कृताद् भाषान्तरेण अनुवादाय कदाचिद् एषा पद्धतिः उपयोगिनी स्यात् चेदपि जीवद्भाषायाः अध्ययने तु सर्वथा अनुपयोगिनी एव । संस्कृतम् अपि जीवद्भाषा एव इत्यतः तस्याः शिक्षणं तया एव भाषया स्यात् । तेन न केवलं संस्कृतवाङ्मये प्रवेशः भवति, अपि तु संस्कृतेन आधुनिकसाहित्यनिर्माणम् अपि शक्यं भवति ।

संस्कृतमाध्यमेन शिक्षणाभावात् एम्.ए., आचार्यः इत्याद्युपाधिधारिणोऽपि अधीतं विषयं संस्कृतेन प्रकटयितुम् असमर्थाः भवन्ति । एतादृशम् अनर्थकरम् उत्साहहीनं चित्रम् अपाकृत्य सार्थकम् उत्साहजनकं च पक्षं पोषयितुं

### १.७.२.२ पाठ्यपुस्तकनिर्माणम्

संस्कृतग्रन्थानां पाठनं संस्कृतेन करणीयं चेत्तदर्थं सरलसंस्कृतेन तेषां व्याख्यानात्मकानां पुस्तकानां निर्माणं करणीयम् । न्याय-व्याकरण-मीमांसादिग्रन्थाः विषयदृष्ट्या यथा गम्भीराः तथा तत्तद्ग्रन्थप्रयुक्तायाः प्रौढसंस्कृत-भाषायाः कारणेनापि दुरूहाः सन्ति इत्यतः तत्र प्रवेष्टुकामानां कृते तेषां पाठ्यग्रन्थानां पुनः सरलसंस्कृतभाषया लेखनं प्रकाशनं च अपेक्ष्यते । संस्कृतभाषानिबद्धानां वाल्मीकि-व्यास-भास-कालिदासादीनां काव्यरचनानां सम्प्रेषणक्रमः सरलया संस्कृतभाषया लिखितैः पुस्तकैः पुनरपि प्रसरेत् । एतदतिरिच्य भूगोलेतिहास-गणितविज्ञानादीनाम् आधुनिकानां पाठ्यविषयाणां पुस्तकानि अपि सरलसंस्कृतेन निर्मातव्यानि सन्ति, येन संस्कृतभाषायाः सर्वव्यापकत्वं, सर्वविषयाणाम् अवबोधनाय योग्यता सामर्थ्यवत्वं च सिद्धं भवेत् ।

### १.७.२.३ संस्कृतभाषानुवादः

अन्याभिः भारतीयाभिः वैदेशिकीभिश्च भाषाभिः रचितानाम् उत्तमानां ग्रन्थानां संस्कृतेन अनुवादकरणेन संस्कृतसाहित्यम् आधुनिकतमं, सुसमृद्धं च भवेत् इति धिया प्रभूतानाम् अपरभाषानिबद्धानां ज्ञानविज्ञानसम्बद्धानां काव्य-कथा-नाट्यानां च संस्कृतानुवादः करणीयः । तदर्थं केवलं सरलं प्रामाणिकं च प्रवाहमयं संस्कृतम् एव उपयोक्तव्यम् । आधुनिककाले एतादृशः व्यवहारः बहुभिः जनैः विविधैः संघटनैः च क्रियमाणः दृश्यते । एतस्मिन् श्लाघ्ये कर्मणि सरलसंस्कृतस्य एव प्रयोगे कृते, इष्टसिद्धौ अधिका व्यापकता, प्रामाणिकता च आगमिष्यति ।

### १.७.२.४ साहित्यसमृद्धिः

आधुनिककाले सकलाभिः आधुनिकभारतीयभाषाभिः, आङ्ग्लादिवैदेशिकभाषाभिः च सह आत्मनः समानता स्वरूपयोग्यतासिद्धिः च करणीया चेत् तदर्थं संख्यात्मकदृष्ट्या, गुणात्मकदृष्ट्या च संस्कृतेन नवीनसाहित्यसृष्टिः अवश्यं करणीया । साहित्यस्य सर्वासु विधासु सर्वेषु आधुनिकविषयेषु च संस्कृतरचनाः स्युः । यद्यपि आधुनिके काले संस्कृतरचनायाः नव्यः कालः समायातः, तथापि सर्वथा लेखकैः सरलसंस्कृतस्य एव प्रयोगः कृत इति नास्ति । यदि इदानीन्तनसंस्कृतरचनानां भाषा पूर्वरचनानाम् इव प्रौढा स्यात् तर्हि आधुनिकभाषाभिः सह समभावं समानगतिं च विनिश्चित्य बहुदूरं गमने महत् काठिन्यम् आपतिष्यति । अतः सहजा सकलजनैः ग्राह्या हृद्या रम्या प्रामाणिकी संस्कृतभाषा एव प्रयोक्तव्या । तेन जनमनसि 'संस्कृतं कठिनम्' इति यः भावः विद्यते सः स्वयमेव अपसृतः भवष्यति । किं च संस्कृतं पुनरपि स्वस्य सर्वजनभाषास्वरूपम् आश्रित्य सुप्रतिष्ठितं भविष्यति ।

### १.८. सरलमानकसंस्कृतं संस्कृतत्वस्य काव्यादीनां वा न हान्यै

सरलमानकसंस्कृतं किं संस्कृतत्वस्य हान्यै न भवेत् इति केषाञ्चित् आतङ्कः स्यात् । संस्कृतस्य पदसम्पत्ति-शब्दवैचित्र्य-सन्धिसमासादीनाम् अप्रयोगः एव भवेत् इति चिन्ता उत्पद्येत । सरलमानकसंस्कृतस्य व्यापकता यदि स्यात् तर्हि भास-बाण-कालिदास-भारवि-श्रीहर्षादीनां काव्यादिसम्पत्तेः का गतिः स्यात् इति प्रश्नः केषाञ्चित् मनसि उदियात् । प्रौढशैल्या आधुनिकसाहित्यसृष्टिः या क्रियते तस्य का गतिः इति भीतिः अपि स्यात् । एते आतङ्कप्रश्न-भीतिचिन्तादयः वस्तुतः निर्मूलाः एव । सरलमानकसंस्कृतं सर्वस्यापि संस्कृतजगतः एव पोषकं, न कदापि हानिकारकम् ।

प्राथमिकस्तरे एव एतस्य उपयोगः प्राधान्येन । प्राथमिकस्तरे महती व्यापकता अपेक्षिता इत्यतः अस्याः क्रियान्वयनविषये अधिकं नैर्भर्यम् आवश्यकं भवति । सरलमानकसंस्कृतम् अवलम्ब्य ये संस्कृतं पठितवन्तः ते स्वज्ञानविकासार्थम् अग्रे गच्छेयुः एव । ते व्याकरणनियमान् सर्वान् अभ्यस्येयुः । विविधानि शास्त्राणि पठेयुः ।

काव्यानाम् अध्ययने रसास्वादने च प्रवृत्ता: भवेयु: च । वेदोपनिषदादय: अपि तै: अध्येतव्या: एव । एतत्सर्वं कर्तुं सरलमानकसंस्कृतमेव द्वारं भवितुम् अर्हति । 'द्वार'द्वारा अन्त: प्रवेश:, अन्त: विद्यमानाया: सम्पद: उपयोग: च उद्दिष्टमस्ति, न तु द्वारे एव विश्राम: ।

'स: निर्गतवान्' इति प्रयोगं य: करोति, स: गच्छता कालेन 'स: निरगच्छत्' इत्यस्य प्रयोगे अपि समर्थ: भवेत्, 'तेन निरगम्यत' इत्यादीनि प्रयुञ्जीत चापि । सम्भवन्त: सर्वविधप्रयोगा: इष्टा: एव । किन्तु यावत् धातूपसर्गसन्धि-नियमादय: न बोध्येरन् तावत् 'निरगच्छत्' इत्यादीनां प्रयोग: मास्तु इति वदति सरलमानकसंस्कृतम् । स्तरानुगुणं बोधनं सर्वेषु अपि क्षेत्रेषु अस्ति एव । अत: सरलमानकसंस्कृतं प्राथमिके स्तरे, सामान्यानां पाठने च उपयोक्तव्यम् इत्येतदेव अभिप्रेतम् अत्र । प्रौढशैल्या: तिरस्कार:, इत: परं सर्वै: अपि सरलमानकशैल्या एव काव्यं रचनीयम् इति अनुरोध: वा सर्वथा नास्ति ।

सरलमानकसंस्कृतं पाणिनिपरिधे: पालने विशेषनैर्भर्यं दर्शयति इत्यत: तन्निबद्धं सर्वं व्याकरणनियमानुसारमेव भविष्यति । व्याकरणनियमबाह्या: प्रयोगा: तु संस्कृतक्षेत्रे एव निषेध्यन्ते इत्यत: सरलमानकसंस्कृते अपि ते निषिद्धा: भवेयु: एव ।

**१.९. मनीषिणां समर्थनम्**

यदेतत्सर्वं विवृतं तत् ऐदम्प्राथम्येन प्रतिपाद्यमानम् अस्ति इति तु न । आधुनिकभारतस्य निर्मातारः बहवः एतस्मिन् विषये अवधानवन्तः आसन् कृतप्रयत्नाः च आसन् । ते न केवलं संस्कृतभाषानिबद्धानां तत्त्वानां संरक्षण-संवर्धनविषये दत्तचित्ताः आसन्, अपि तु तेषु तात्त्विकविवेकेषु प्रवेशाय सामान्यजनानां यथा सामर्थ्यं स्यात् तथा सरलं प्रामाणिकं च संस्कृतं प्रयोक्तव्यम् इति स्वाभिमतं समुपस्थापितवन्तः आसन् अपि । वाराणस्यां काशीहिन्दू-विश्वविद्यालयस्य स्थापनायाः प्राथमिककाले एतस्य संस्थापकः भारतरत्नं महामनाः पण्डितः मदनमोहनमालवीयः सरलसंस्कृतशिक्षणाय 'संस्कृतसरणिः' इत्याख्यं पुस्तकं लेखितवान् । अत्र लघुवाक्यव्यवहारमुखेन साक्षात् संस्कृतभाषायाः मौलिकान् सरलान् च प्रयोगान् ग्रन्थकारः दर्शयति । किं च 'पुरुषः, कुमारः, समुद्रः, कुटुम्बम्, गगनम्, पुस्तकम्, लता, नदी, बाला इत्यादयः शब्दाः; नमति, मिलति, हसति, गायति, रटति, रक्षति, धावति इत्यादयः अतिप्रचलितक्रियाः च संस्कृतभाषायां प्रवेशाय प्रदर्शिताः सन्ति तत्र । 'अयं राजमार्गः, अत्र जनाः सञ्चरन्ति' इत्येतादृशानि लघुवाक्यानि प्रयुज्य तन्मुखेन सम्बद्धं तत्त्वं यथा विज्ञापितं, तथा संस्कृतभाषायाः सकलजनमनोरमणीयता अपि सम्यक् साधिता अस्ति ।

विश्वकविः रवीन्द्रनाथठाकुरोऽपि 'पाठ्यपुस्तक'शीर्षकेण यथा आङ्ग्लभाषाशिक्षणाय 'इंराजि-सोपान' इति पुस्तकं रचितवान् तथैव संस्कृतभाषायाः शिक्षणाय बङ्गभाषामाध्यमेन 'संस्कृतशिक्षा'नामधेयं पुस्तकं भागद्वयेन लिखितवान् (- रवीन्द्ररचनावली, भागः १५, विश्वभारती, कलिकता, अत्र द्वितीयभागः प्रकाशितोऽस्ति, प्रथमो भागः प्रकशनाधीनो विद्यते) । अत्र अपि लघुवाक्यप्रयोगद्वारा प्रश्नोत्तरविधिना संस्कृतशिक्षणस्य सरलमार्गः प्रदर्शितः अस्ति ।

स्वामी विवेकानन्दः संस्कृतस्य भाषात्वविषये अनतिसाधारणः श्रद्धालुः आसीत् । स्वप्रेरणया सः न केवलं मुग्धबोधव्याकरणं कण्ठस्थीकृतवान्, लघुकौमुदीं चाधीतवान्, अपि तु बहूनां धर्म-दर्शनशास्त्राणां गहनम् अध्ययनम् अपि कृतवान् । प्रवासाङ्गतया 'पोरबन्दरं' गतेन तेन तत्रत्येन पण्डितशङ्करपाण्डुरङ्गवर्येण क्रियमाणे वेदानुवादकर्मणि साहाय्यमपि विहितम् । संस्कृतस्य सरलसहजरूपाणां प्रयोगः प्रचारश्च करणीयः इति तस्य मतम् आसीत् । 'हरिः' इति शब्दस्य पर्यायत्वेन 'अघभवनरकविनाशनः', 'त्रिपुरमदभञ्जनः', 'अशेषनिश्शेषकल्याणकरः'

इत्यादिकठिनशब्दप्रयोगं स न अनुमन्यते स्म । तस्य मतम् आसीत् यत् या भाषा प्रयुज्येत सा सरला, सहजा, सर्वजनबोधगम्या च भवेदिति । सः वदति स्म यत् 'संस्कृतशब्दानाम् उच्चारणमात्रेण एव भारतीयेषु कश्चन गौरवभावः समुत्पद्यते' इति । त्रिशूरनगरे प्रवासकाले 'कोचुन्नी थम्पुरन्-भट्टन् थम्पुरन्' इति राजकुमारद्वयेन सह स्वामिवर्येण संस्कृतेन एव सम्भाषणं विहितम् इति तयोः कृते परमविस्मयकारकः अयं प्रसङ्गः आसीत् ।

नोबल्-पुरस्कारविजेत्रा विश्वप्रसिद्धेन भौतिकशास्त्रविदा डा. सी.वी.रामनमहोदयेन कथितम् आसीत् यत् 'संस्कृतम् अस्माकं धमनीषु प्रवहद् अस्ति, केवलं संस्कृतेन एव देशस्य एकता सुरक्षिता भवितुम् अर्हति' इति ।

भारतस्य सांविधानिकपरिषदि १९४९ वर्षस्य सितम्बरमासस्य १२ दिनाङ्के यदा श्रीमता नजिरुद्दिन् अहमदमहोदयेन प्रस्तावितम् आसीद् यत् संस्कृतं भारतस्य 'राजभाषा' भवेदिति, तदा तत्र उपस्थितेन डा. भीमराव अम्बेदकरमहोदयेन स प्रस्तावः समर्थितः आसीत् ।

१९९४ तमे वर्षे बेळगांव्-नगरे प्रवृत्तायां कांग्रेस्-सभायां वासिष्ठगणपतिमुनिः संस्कृतस्य सरलं मुखम् उपस्थाप्य तत् स्वरूपं 'ललिता भाषा' (लालीभाषा) इति निर्दिश्य 'एतत्स्वरूपयुक्ता संस्कृतभाषा एव भारतस्य राजभाषा भवितुम् अर्हति' इति प्रतिपादितवान्, यस्यां च सभायां गान्धिमालवीयप्रभृतयः राष्ट्रनेतारः वेदिकायाम् उपस्थिताः आसन् । (महातपस्वी - काव्यकण्ठस्य गणपतिमुनेः जीवनचित्रम् - ए.सि.रमणः, आङ्ग्लानुवादः - श्रीमती सोत्ती अनसूयम्मा, पृ ३५-२३८)

एकविंशशतके अन्तर्जालयुगेऽस्मिन् 'वीकीपेडिया'विशेषज्ञेन श्रीमता सैयद मुजाम्मिलुद्दिनवर्येण संस्कृतभाषा-व्यवहारस्य व्यापकतां साधयितुं विशिष्टः यत्नः क्रियमाणोऽस्ति ।

एवं संस्कृतस्य सरलतासमर्थकाः आसन् बहवः मनीषिणः । अरविन्दाश्रमस्य अरविन्दमहर्षिः, तच्छिष्या श्रीमाता च सबलं वदतः स्म यत् संस्कृतस्य पाठनं सरलसंस्कृतेन एव स्यात् इति । सा एव परम्परा अनुवर्तते अरविन्दाश्रमे अद्यापि । वाराणसेयः वासुदेवद्विवेदी शास्त्री आजीवनं सरलसंस्कृतप्रसाराय महान्तं प्रयासं कृतवान् । बहवः ग्रन्थाः अपि तेन लिखिताः सरलसंस्कृतेन एव । सः पृच्छति - 'भवता यन्मुखेनैव आओ, जाओ निगद्यते । आगच्छ गच्छेति कथं तन्मुखेनैव नोच्यते ?' इति । महाराष्ट्रीयस्य भण्डारकरवर्यस्य, एतादृशानाम् अन्येषां विदुषां च बहवः प्रयासाः एतस्मिन् क्षेत्रे अनुपमाः एव सन्ति ।

अन्यः कश्चन अंशः अत्र अवश्यम् उल्लेखनीयः अस्ति । उत्तरप्रदेशीयः मान्यः साहित्यरत्नं विद्याभूषणः श्यामकुमारसिंहवर्यः (आगरास्थायाः भारतीयविद्यासमितेः मन्त्री) १९४९ तमे वर्षे 'कीदृशं संस्कृतम् ?' इति पुस्तकं प्रकाशितवान् । १८७ पुटात्मके स्वीये पुस्तके सः सरलसंस्कृतस्य आवश्यकतां विस्तरेण प्रतिपाद्य तस्य स्वरूपमपि विशदय्य, बहूनां विदुषां मतमपि विमृश्य कथयति - 'यदि पण्डिताः भारतीयाः वा इच्छन्ति यत् संस्कृतं भूयः अपि देशस्य राष्ट्रभाषा अन्ताराष्ट्रीया भाषा च भवेत् पूर्ववत् इति, तर्हि तस्य सारल्यम् आवश्यकम् अनिवार्यं च' इति ।

सर्वस्यास्य परिशीलनात् स्पष्टं भवति यत् सरलमानकसंस्कृतम् अद्यतनस्य कालस्य अनन्यावलम्बनम् इति संस्कृतस्य प्रसाराय संरक्षणाय च सरलमानकसंस्कृतं किञ्चन विशिष्टं साधनम् इति च ।

### द्वितीयः अध्यायः

## २. सरलसंस्कृतस्य स्वरूपम्

### २.१. प्रस्तावना

सामान्यव्यवहारे सर्वैः अपि सरला भाषा प्रयोक्तव्या इत्यंशं प्रायः सर्वे अपि अङ्गीकुर्वन्ति । किन्तु अस्माभिः प्रयुज्यमाना भाषा सरला अस्ति, उत न इत्यत्र निर्णायकः अंशः कः इति प्रश्नः उदेति । यम् उद्दिश्य अस्माभिः भाषाप्रयोगः कृतः भवति सः जनः अस्माकम् अभिप्रायम् अवगन्तुं शक्तः, उत न इति अस्माभिः स्वयमेव आत्मा प्रष्टव्यः । यदि शक्तः स्यात् तर्हि अस्माकं भाषा सरला इति, यदि न शक्तः स्यात् तर्हि सरला नास्ति इति च आपाततः निर्णेतुं शक्यते ।

येन जीवने कदापि संस्कृतं न पठितं तादृशः कथं वा संस्कृतेन उक्तम् अर्थम् अवगन्तुं शक्नुयात् इति प्रश्नः भवति एव । किन्तु यां काञ्चित् भारतीयभाषां जानन्तः अपि जनाः सरलसंस्कृतेन उक्तम् अर्थम् अवगन्तुं शक्नुवन्ति इत्येषः बहूनाम् अनुभवः । यतः तैः अद्यपर्यन्तं संस्कृतभाषणं संस्कृतसम्भाषणं वा श्रुतं न स्यात् चेदपि बहून् संस्कृतशब्दान् तु ते जानन्ति एव । यतः सर्वासु अपि भारतीयभाषासु बहवः संस्कृतशब्दाः भवन्ति एव । ते संस्कृतशब्दाः इति अजानन्तः अपि ते तान् शब्दान् जानन्ति एव । ज्ञातानाम् एव शब्दानां प्रयोगः यदा श्रूयते तदा अर्थावगमनं न क्लेशाय ।

प्रायः सर्वासाम् अपि भारतीयभाषाणां वाक्यरचना समाना । व्याकरणं च समानम् । बोधव्यवस्था अपि समाना । प्रतिपादनरीतौ अल्पः भेदः स्यात् चेदपि एतेषु अंशेषु महत् साम्यं तु अस्ति एव । अतः मातृभाषां जानन् कोऽपि भारतीयः तस्याः भाषायाः संस्कारवशात् एव संस्कृतभाषां सुखेन अवगन्तुं शक्नोति ।

तथा च सरलं कठिनमिति वा निर्धारणे श्रोतॄणाम् अवगमनानवगमने एव निमित्तभूते इति आगतम् । तत्र पुनः अयं प्रश्नः उदेति । ..... कश्चन महाविद्वान् संस्कृतेन व्यवहृतवान् । तत्समाः पण्डिताः, तच्छिष्याः च तत् अवगन्तुं शक्ताः, यतः तेषां तादृशम् उत्तमं संस्कृतज्ञानम् अस्ति । पुनः पुनः तस्य मुखात् तादृशभाषणश्रवणेन ते तु तदीयां भाषाम् अवगन्तुं क्लेशं न अनुभवेयुः । किम् एतां भाषां वयं सरलां भावयितुम् अर्हेम ? न खलु ? सा भाषा अत्यन्तं कठिना अपि भवितुम् अर्हति । केषाञ्चित् दृष्ट्या सा दुर्बोधा अपि भवेत् ।

कैश्चित् पाण्डित्यप्रकर्षप्रदर्शनाय लेखने सामान्यजनानाम् अपरिचिताः शब्दाः प्रयुज्यन्ते । 'त्वया निर्दोषं कथितम्' इति वक्तव्ये 'श्रीमतानादीनवमभ्यधायि' इति कथ्यते । 'दोष आदीनवः प्रोक्तः' इति कोशं यः जानाति सः एव एतस्य वाक्यस्य तात्पर्यं परिजानाति । 'एतत् असन्दिग्धम्' इति वक्तव्ये 'एतदद्वापरम्' इति केचन कथयन्ति । 'विचिकित्सा तु संशयः । सन्देहद्वापरौ च' इति कोशं यः जानाति सः एव अस्य तात्पर्यम् अवगच्छति । केचन दीर्घसमासान् क्लिष्टसन्धिबन्धांश्च कुर्वन्ति । (एच्. वि. नागराजराव्, सुधर्मा-सम्पादकीयम्, ३.८.१६) एतादृशी प्रवृत्तिः भाषायाः दुर्बोधताम् एव सम्पादयेत्, नान्यत् किमपि ।

एवं तर्हि सरलतानिर्णायकः मानदण्डः कः भवेत् ?

### २.२. सरलतानिर्णायकः मानदण्डः

यं संस्कृतभाषाप्रयोगं श्रुत्वा सामान्यसंस्कृतज्ञानवान् संस्कृताभ्यासी, संस्कृतानभिज्ञः वा अर्थम् अवगन्तुं शक्नुयात् तदेव सरलसंस्कृतं नाम इति सामान्यतः वक्तुं शक्नुयाम वयम्।

वस्तुतः सरलसंस्कृते अपि स्तरद्वयं भवति - अवगमनयोग्यः प्रयोगयोग्यः चेति।

अद्यपर्यन्तं येन साक्षात् संस्कृतस्य अध्ययनं न कृतं तादृशः जनः अपि यत् श्रुत्वा कथयितुः आशयं क्लेशं विना सम्यक् अवगन्तुं शक्नुयात्, सः भवति **अवगमनयोग्यः स्तरः**।

सामान्यसंस्कृतज्ञानवान् संस्कृताभ्यासी कश्चित् यं स्तरम् अवलम्ब्य स्वस्य भावान् विना क्लेशम् अभिव्यञ्जयितुं शक्नुयात् सः भवति **प्रयोगयोग्यः स्तरः** इति।

अवगमनाय सामान्यः श्रवणसंस्कारः, केषाञ्चित् संस्कृतशब्दानां परिचयः, अवगन्तव्यम् इति अभिलाषः इत्यादयः अपेक्ष्यन्ते। अस्मिन् स्तरे श्रोत्रा भाषानियमानां स्पष्टज्ञानं प्राप्तव्यं न भवति। तात्पर्यग्रहणमात्रम् अत्र इष्यते। वक्ता श्रोतृग्राह्यान् एव शब्दान्, श्रोतृग्राह्यां शैलीं च अवलम्ब्य वेगेन विना साभिनयं यदि संस्कृतेन वदेत् तर्हि अनधीतसंस्कृतः अपि श्रोता संस्कृतम् अवगन्तुं शक्नुयात् एव।

प्रयोगयोग्यता प्राप्तव्या चेत् तु भाषानियमाः स्पष्टतया ज्ञातव्याः एव भवन्ति। नियमज्ञानमात्रेण अपि न अलम्, अपि तु तेषां नियमानां प्रयोगकौशलम् अपि तेन आप्तव्यं भवति। अतः प्रयोक्त्रा नियततया कश्चन भाषाभ्यासः अपि करणीयः भवति एव। अतः प्रयोगयोग्यस्तरप्राप्तिः परिश्रमसापेक्षः।

एवं चेत् अनधीतसंस्कृतः अपि जनः अस्माभिः उक्तं यथा अवगच्छेत् तथा कर्तुं संस्कृतं सरलीकृत्य प्रयोक्तव्यं किम् इति कश्चन प्रश्नः उत्पन्नः भवेत्। न तथा। संस्कृतस्य सरलीकरणं (simplifiying) न उचितं, न अपेक्षितं च। सारल्यं संस्कृते इदानीमेव अस्ति। अत्र उदाहरणरूपेण महाभाष्यप्रयोगाः, शङ्कराचार्यभाष्यप्रयोगाः च बहुधा दर्शयितुं शक्याः। किन्तु आ बहोः कालात् बहुभिः कारणैः तत् सरलं (Simple) मुखं प्रदर्शितं न अभवत्। अधुना अस्माभिः तस्य प्रदर्शनं करणीयम्, तावदेव। एवं चेत् संस्कृतस्य सरलमुखस्य प्रदर्शनाय अस्माभिः केचन उपायाः अनुसर्तव्याः भवन्ति। यथा - परिमितानामेव शब्दानां क्रियापदानां च उपयोगः, सरूपाणामेव शब्दानां क्रियापदानां च उपयोगः इत्यादयः। तन्नाम भाषाप्रयोगकर्ता स्वस्मिन् महति ज्ञाने सति अपि तत्र अत्यल्पमेव भागम् उपयुज्य व्यवहारं कुर्यात्। एतदर्थं तेन बुद्धिपूर्वकतया विशेषप्रयत्नः एव करणीयः भवति।

सरलमानकसंस्कृतस्य सामान्यनियमान् पश्याम तावत् -

### २.३. सरलमानकसंस्कृतस्य सामान्यनियमाः

* अजन्तेषु हलन्तेषु च स्थिताः सामान्यशब्दाः प्रयोक्तव्याः, केचन सर्वनामशब्दाः च।
* सुबन्तेषु अधोनिर्दिष्टप्रकारकाः शब्दाः स्वीकार्याः भवितुम् अर्हन्ति -
  संज्ञाशब्दाः, जातिगुणवचकाः शब्दाः, ल्युट्-घञ्-अच्-क्तिन्-प्रभृतयः शब्दाः, भाववाचकाः शब्दाः, सम्बन्धवाचकाः शब्दाः, - सङ्ख्यावाचकाः पूरणप्रत्ययान्ताः च शब्दाः इत्यादयः।
* दशसु लकारेषु लट्-लोट्-लृट्-लकाराः प्रयोक्तव्याः। भूतकाले क्त-क्तवत्वोः प्रयोगः भवितुम् अर्हति। प्रगतस्तरे विधिलिङ्-लकारः लङ्-लकारः (उपसर्गरहितधातूनाम्) च प्रयोक्तुं शक्यः।

* धातुषु प्रथम-चतुर्थ-षष्ठ-दशमगणेषु (१, ४, ६, १०) पठिताः परस्मैपदिनः धातवः प्रयोक्तव्याः । अन्यगणीयानाम् अपेक्षायां सत्यां ल्युडन्तेन सह भाववाचकप्रत्यययुक्तेन अन्येन सह वा 'करोति' इत्यस्य प्रयोगः कर्तुं शक्यः । आत्मनेपदस्थले अपि एवमेव भवितुम् अर्हति । (औचित्यम् अनुसृत्य प्रयोगः निर्णेतव्यः) – उदा - शेते – शयनं करोति ।
* सोपसर्गधातूनां प्रयोगतः कांश्चन एव धातून् अवलम्ब्य बहूनि क्रियापदानि निर्मातुं शक्यानि ।
* करोति-जानाति-गृह्णाति-अस्ति-ददाति-रोचतेप्रभृतयः विशेषधातुत्वेन प्रयोक्तव्याः ।
* क्त्वा-तुमुनादयः प्राथमिकस्तरे, ल्यप्-शत्रादयः प्रगतस्तरे च प्रयोक्तुं शक्याः ।
* 'आगम्यताम्' इत्यादयः वचोविच्छित्तिरूपेण (ईडियम् रूपेण) प्रयोक्तुं शक्याः ।
* यत्र यत्र शक्यं तत्र सर्वत्र अव्ययपदानां प्रयोगः चिन्तनीयः ।
* प्रयोगयोग्यः स्तरः मनसि स्थापनीयः । (तदा तु अवगमनयोग्यता तु सिद्धा भवेत् एव ।) अतः शब्दानां व्याकरणनियमानां वा स्वीकरणावसरे प्रयोगयोग्यत्वं प्राथम्यम् आवहेत् । अपवादरहिताः एव नियमाः प्रशस्यन्ते । अथवा अल्पापवादयुक्ताः वा नियमाः स्वीकर्तव्याः । अपवादबहुलाः नियमाः काठिन्याय भवन्ति ।
* ये सरलतासम्बद्धाः नियमाः चिन्त्यन्ते ते पाणिनिनियमानुगुणाः एव स्युः ।

पाणिनिनियमबहिर्भूतः अंशः असाधुत्वेन अपशब्दत्वेन च परिगण्यते ।

सरलसंकृते अपि स्तरद्वयं स्तरत्रयं वा चिन्तयितुं शक्यम् । ये भाषाभ्यासम् आरब्धवन्तः स्युः, तन्नाम अत्यल्पमेव भाषां जानीयुः तेषां निमित्तं परमप्राथमिकस्तरः, किञ्चिदधिकं ये जानीयुः तेषां निमित्तम् अल्पप्रगतस्तरः, इतोऽपि अधिकं ये जानीयुः तेषां निमित्तं प्रगतस्तरः चेति स्तरत्रयं चिन्तयितुं शक्यम् ।

**२.३.१. परमप्राथमिकः स्तरः**

**२.३.१.१. अजन्तशब्दानाम् एव प्रयोगः**

अजन्तशब्दाः यथा, तथा संस्कृते हलन्तशब्दाः अपि बहवः सन्ति । तेषां सर्वेषाम् अपि रूपाणि विभिन्नानि भवन्ति । अजन्तशब्देषु अपि अन्तभेदेन रूपाणि भिद्यन्ते । सरलसंस्कृते यावच्छक्यम् अजन्तशब्दानाम् एव प्रयोगः करणीयः । तत्रापि अकारान्तपुंलिङ्गशब्दानाम्, अकारान्तनपुंसकलिङ्ग-शब्दानाम्, आकारान्त-ईकारान्त-स्त्रीलिङ्गशब्दानां च प्रयोगः करणीयः । यथा -

(अ) अकारान्तपुंलिङ्गशब्दाः - बालकः, वृक्षः, मार्गः, आपणः, अध्यापकः, विद्यालयः, कार्यालयः, सोदरः, जनकः इत्यादयः ।

(आ) अकारान्तनपुंसकलिङ्गशब्दाः - फलम्, नगरम्, पुष्पम्, वातायनम्, द्वारम्, भवनम् इत्यादयः ।

(इ) आकारान्ताः ईकारान्ताः च स्त्रीलिङ्गशब्दाः - लता, माला, शाला, बालिका, महिला, भाषा इत्यादयः, लेखनी, अङ्कनी, भगिनी, जननी, विद्यर्थिनी, नदी इत्यादयः च ।

एतदत्र स्मारयितुम् इष्यते यत् सर्वैः अपि प्रमाणत्वेन अभ्युपगम्यमाने व्यवहारप्रतिनिधिभूते अमरकोषे अपि एतादृशाः चतुर्विधशब्दाः एव आधिक्येन (प्रायः ८० %) सन्ति इति । अस्मात् स्पष्टं यत् व्यवहारे एते चतुर्विधाः

शब्दाः एव आधिक्येन सन्ति इति, एतेषां चतुर्विधानां केषाञ्चित् सर्वनाम्नां केषाञ्चित् अव्ययानां च आधारेण सर्वविधाः अपि अभिप्रायाः विना क्लेशं विना दोषं च प्रकाशयितुं शक्याः इति । अतः एतैः चतुर्विधैः एव शब्दैः व्यवहारं निर्वोढुं प्रयत्नः करणीयः, येन श्रोतुः प्रयोक्तुः च श्रमः नितरां न्यूनः भवेत् ।

कुत्रचित् शब्दः अकारान्तः नास्ति चेदपि तस्य अन्यस्य शब्दस्य योजनेन अकारान्तत्वं साधयितुं शक्यते । यथा - राजन् इति नकारान्तः शब्दः । किन्तु समासे कृते सति सः अकारान्तः भवति । (राजाहस्सखिभ्यष्टच्) अतः अस्माभिः हलन्तः राजशब्दः यत्र प्रयोक्तव्यः; तत्र सर्वत्र अकारान्तः महाराजशब्दः प्रयोक्तुं शक्यः । एवमेव हलन्तः 'सुहृत्'शब्दः यत्र प्रयोक्तव्यः तत्र अजन्तः 'मित्र'शब्दः प्रयोक्तुं शक्यः । अन्यानि उदाहरणानि यथा - मुनिः - मुनिवरः, वक्षः - वक्षःस्थलम् इत्यादयः ।

### २.३.१.२. पर्यायशब्दानां प्रयोगे चिन्तनम्

एकमेव अर्थं बोधयन्तः समानार्थकाः शब्दाः (पर्यायशब्दाः) संस्कृते भवन्ति बहवः । कमपि अर्थं बोधयितुं कश्चन शब्दः यदा स्वीकर्तव्यः भवति तदा अस्माभिः तदर्थकेषु पर्यायशब्देषु अकारान्तः शब्दः एव स्वीकर्तव्यः । यथा - हस्तिन्, करिन् इत्यादयः बहवः शब्दाः सन्ति चेदपि अस्माभिः तम् अर्थं बोधयितुं गजः इत्येषः अकारान्तः शब्दः एव स्वीकर्तव्यः ।

एवमेव जलमुक्, जलदः, वारिदः, अम्बुभृत् इत्यादिषु बहुषु शब्देषु सत्सु अपि अस्माभिः मेघः इति अकारान्तः शब्दः एव स्वीकर्तव्यः ।

अनेन प्रकारेण चतुर्विधानाम् एव शब्दानां प्रयोगेण महत् सारल्यं सिद्धं भवति ।

समानार्थकाः अकारान्ताः एव बहवः शब्दाः स्युः कदाचित् । यथा - गजः, इभः, द्विपः, वारणः इत्यादयः । तदा तु तेषु शब्देषु मातृभाषायां यः संस्कृतशब्दः प्रसिद्धः अस्ति सः एव स्वीकरणीयः । उपरि उक्ते उदाहरणे गजः इति शब्दः एव अत्यन्तं प्रसिद्धः अस्ति । प्रायः मातृभाषायाम् अपि प्रयुक्तः भवति । अतः सः एव स्वीकरणीयः, न तु अप्रसिद्धाः इभादयः ।

मातृभाषायां ये संस्कृतशब्दाः स्युः तेषाम् एव स्वीकरणात् श्रोता विना क्लेशम् अर्थम् अवगच्छति । एते सर्वे शब्दाः मया ज्ञायन्ते इति बुद्धिः तस्मिन् उपजायते । तदा सहजतया संस्कृतस्य सरलतां मनसा अभ्युपगच्छति सः । संस्कृतस्य अनभिज्ञान् उद्दिश्य कथनसमये तु अयम् अंशः नितराम् उपकारकः । विद्यालये अध्यापनसमये, सामान्यान् उद्दिश्य लेखनसमये कथनसमये च अयमेव अंशः तारकः ।

एकमेव अर्थं बोधयितुं विभिन्नानां बहूनां शब्दानां प्रयोगः संस्कृतभाषायां प्रायेण क्रियते । तादृशेषु अवसरेषु श्रोतृणां मनसि सम्भाव्यं भ्रमं निवारयितुं सरलसंस्कृते एकस्मिन् अर्थे एकः एव शब्दः प्रयोक्तव्यः । अन्तपर्यन्तमपि तस्य एव शब्दस्य प्रयोगः करणीयः । एकस्मिन् वाक्ये मेघः इति, अन्यस्मिन् वाक्ये जलदः इति, अपरस्मिन् वाक्ये वारिदः इति, पुनः अन्यस्मिन् जलमुक् इति च यदि प्रयुज्यते तर्हि अनधीतसंस्कृतः जनः निश्चयेन भ्रान्तिं प्राप्नोति । अतः एकस्मिन् अर्थे एकः एव शब्दः इत्येतत् नियमत्वेन एव स्वीकर्तुं शक्यते ।

ईदृशः अपरः अपि नियमः भवितुम् अर्हति - एकः शब्दः एकस्मिन् अर्थे एव इति । नानार्थकाः शब्दाः अनेके संस्कृते प्रसिद्धाः । यथा - हरिः इत्यस्य शब्दस्य विष्णुः, सूर्यः, सिंहः, कपिः इत्यादयः अनेके अर्थाः भवन्ति ।

अस्माभिः तु विष्णुः इति एकस्मिन् अर्थे एव तस्य शब्दस्य प्रयोगः करणीयः । तदा तु अस्माभिः यत्र यत्र हरिः इति शब्दः प्रयुक्तः भवति तत्र सर्वत्र श्रोता विष्णुः इति समानम् एकमेव अर्थं गृह्णाति । तदा तस्य भूयान् एव क्लेशः निवारितः भवति ।

### २.३.१.३. युष्मदर्थे भवच्छब्दस्य प्रयोगः

प्रथमपुरुषः मध्यमपुरुषः उत्तमपुरुषः चेति त्रयः पुरुषाः संस्कृतभाषायां प्रयुज्यन्ते इति वयं जानीमः एव । तत्र अस्मच्छब्दस्य प्रयोगः यदा क्रियते तदा उत्तमपुरुषस्य प्रयोगः एव करणीयः इत्यपि वयं जानीमः । उत्तमपुरुषस्य प्रयोगं विना व्यवहारः एव न सम्भवति । (सम्भाव्येत चेदपि महता कष्टेन करणीयः भवति । यथा - 'अहं गच्छामि' इत्यर्थे 'अयं जनः गच्छति' इत्येतादृशः असहजः प्रयोगः करणीयः भवति । तथा कृतं चेत् तत्र कृत्रिमता अपि अनुभूयते ।) युष्मच्छब्दस्य प्रयोगः यदा क्रियते तदा तु मध्यमपुरुषस्य प्रयोगः एव करणीयः इति व्याकरणनियमः अस्ति । (युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः - १-४-१०५) सरलसंस्कृते अस्माभिः युष्मच्छब्दस्य प्रयोगः परमप्राथमिकस्तरे परिहर्तुं शक्यः । तन्नाम यत्र यत्र युष्मच्छब्दस्य प्रयोगः करणीयः भवति तत्र सर्वत्र भवच्छब्दस्य प्रयोगः भवितुम् अर्हति । एवं क्रियते चेत् प्रत्येकं धातोः प्रतिलकारं मध्यमपुरुषस्य त्रीणि रूपाणि विहाय एव अस्माभिः व्यवहारः कर्तुं शक्यते । यतः भवच्छब्दस्य योगे तु मध्यमपुरुषस्य प्रयोगः करणीयः नास्ति । तदा तु 'शेषे प्रथमः' इति सूत्रम् अवलम्ब्य प्रथमपुरुषस्य प्रयोगः । तथा क्रियते चेत् प्रथमपुरुषः, उत्तमपुरुषः चेति पुरुषद्वयस्य प्रयोगेण एव सर्वमपि व्यवहारं कर्तुं शक्नुमः । एवं प्रयोगावसरे अस्माभिः युष्मदर्थः न परित्यक्तः, परन्तु तम् अर्थं वयं भवच्छब्दप्रयोगेण वदन्तः स्मः इति न विस्मर्तव्यम् ।

एवं चेत् यत्र यत्र युष्मच्छब्दः प्रयोक्तव्यः भवति तत्र सर्वत्र भवच्छब्दस्य प्रयोगः औचित्यम् आवहति किम् इति कश्चन प्रश्नः भवितुम् अर्हति । राजा सेवकम् उद्दिश्य भवच्छब्दं प्रयोक्तुम् अर्हति किम्, गुरुः शिष्यम् उद्दिश्य, ज्येष्ठः बालम् उद्दिश्य वा युष्मच्छब्दस्य स्थाने भवच्छब्दस्य प्रयोगं यदि करोति तर्हि तत् उचितं किम् इति केचन प्रश्नाः सम्भवेयुः एव । परन्तु तद्विषये महती चिन्ता न करणीया । यतः प्राचीनैः कविभिः अन्यैः चापि तत्र तत्र तादृशाः प्रयोगाः कृताः सन्ति एव । कालिदासप्रभृतिभिः महाकविभिः अपि युष्मच्छब्दस्य भवच्छब्दस्य च समाने अर्थे प्रयोगः कृतः दृश्यते । समाने श्लोके समानं कर्तारम् उद्दिश्य सकृत् युष्मच्छब्देन, ततः भवच्छब्देन च निर्देशः कृतः दृश्यते ।

यथा - 'स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ।' - (रघुवंशे द्वितीयसर्गे)

अत्र सिंहः महाराजं दिलीपम् उद्दिश्य आदौ 'त्वम्' इति युष्मच्छब्दप्रयोगं कृत्वा ततः 'भवान्' इति भवच्छब्दप्रयोगं करोति ।

सेवकजनेषु भवच्छब्दस्य प्रयोगविषये महाकवेः कालिदासस्य प्रयोगमेव उदाहर्तुं शक्नुमः । अभिज्ञान-शाकुन्तले महाराजः दुष्यन्तः सेवकजनम् उद्दिश्य भवच्छब्दप्रयोगं करोति । तथा -

राजा - (परिजनं विलोक्य) अपनयन्तु भवत्यो मृगयावेषम् इति । - द्वितीये अङ्के ।

पञ्चतन्त्रादिषु ग्रन्थेषु अपि तादृशानि बहूनि उदाहरणानि दृश्यन्ते । अतः युष्मच्छब्दस्य स्थाने भवच्छब्दस्य प्रयोगे शिष्टप्रयोगप्रामाण्यम् अस्ति एव, शास्त्रसम्मतिः चापि अस्ति इति निर्णेतुं शक्यते ।

### २.३.१.४. एकवचन-बहुवचनयोः प्रयोगः

एकवचनं  द्विवचनं बहुवचनं चेति त्रीणि वचनानि संस्कृतभाषायां सन्ति । वस्तुतः जगतः कासुचित् एव भाषासु द्विवचनम् अस्ति । अतः संस्कृते द्विवचनस्य प्रयोगे प्राथमिकाः अभ्यासिनः मुह्यन्ति । प्रमादम् अपि कुर्वन्ति । सरलसंस्कृतप्रयोगावसरे वयं द्विवचनस्य प्रयोगं परिहरामः चेत् वरम् । यतः कर्तरिप्रयोगे कर्तृपदं द्विवचनान्तं प्रयुक्तं चेत् तदनुसारेण क्रियापदमपि द्विवचनान्तमेव प्रयोक्तव्यम् । (यथा - बालकौ ग्रन्थं पठतः ।) कर्मणिप्रयोगे कर्मपदं द्विवचनान्तं चेत् तदनुसारेण क्रियापदमपि द्विवचनान्तमेव प्रयोक्तव्यम् । (यथा - बालकेन ग्रन्थौ पठ्येते ।) किन्तु भाषाप्रयोगकर्तुः मुखात् तानि द्विवचनरूपाणि सुखेन न निस्सरन्ति । तदा तु सः अधीतसंस्कृतः चेत्, तेन मनसि एव 'पठति पठतः पठन्ति...' इत्येवं लकाररूपाणां सकृत् आवर्तनं कृत्वा, द्विवचनरूपं स्मृत्वा अनन्तरं वक्तव्यं भवति । तत्रापि, सर्वे तानि रूपणि न स्मरन्ति । विद्वांसः अपि लट्लकाररूपाणि कदाचित् स्मरेयुः चेदपि अन्यलकाररूपेषु प्रायः प्रमाद्यन्ति, अभ्यासस्य अभावात् । अतः वक्तुः दृष्ट्या अपि द्विवचनस्य प्रयोगः क्लेशाय । श्रोतुः दृष्ट्या तु इतोऽपि क्लेशाय । यतः मातृभाषायां तस्य प्रयोगः नास्ति इत्यतः श्रोता तदवगमने क्लेशम् अनुभविष्यति एव । अतः सामान्यव्यवहारे द्विवचनस्य परिहारः एव श्रेयसे ।

एवं चेत् द्विवचनरूपस्य अर्थस्य कथनं कथम्  इति प्रश्नः समुद्भवति । तदा तु उपायान्तरम् आश्रयणीयम् । 'द्वयम् ' इत्यस्य योजनेन तस्य एव अर्थस्य आविष्करणं कर्तुं शक्यते ।

यथा - 'बालकौ' इति वक्तव्ये 'बालकद्वयम्' इति, 'बालिके' इति वक्तव्ये 'बालिकाद्वयम्' इति, 'फले' इति वक्तव्ये 'फलद्वयम्' इति च वक्तुं शक्यते । तदा तु बालकद्वयम् अस्ति, बालिकाद्वयम् अस्ति, फलद्वयम् आनय इति एकवचनान्तं क्रियापदं प्रयोक्तव्यम् ।

एवं चेत् द्विवचनप्रयोगेण विना एव वयं सर्वम् अपि व्यवहारं निर्वोढुं शक्नुयाम; तदा तु प्रतिलकारं त्रीणि द्विवचनरूपाणि व्यवहारे अपेक्षितानि न भवन्ति ।

एतावता अस्माभिः द्विवचनस्य परित्यागः कृतः इति न चिन्तनीयम् । सरलसंस्कृतप्रयोगावसरे, तत्रापि पूर्वोक्तेषु त्रिषु स्तरेषु प्रथमस्तरद्वये द्विवचनस्य परिहारः कृतः चेत् अपि व्यवहारे कापि क्षतिः न भवति इत्येव तात्पर्यम् । इत्थं च द्विवचनस्य मध्यमपुरुषस्य च परिहारेण लकाररूपेषु महत् लाघवं सम्पादितं भवति ।

| यथा - | | | |
|---|---|---|---|
| यथा - | पठति | पठतः | पठन्ति |
| | पठसि | पठथः | पठथ |
| | पठामि | पठावः | पठामः |

इत्येतेषु पठधातोः नवसु लट्लकाररूपेषु 'पठति, पठन्ति, पठामि, पठामः' - इत्येतानि चत्वारि एव रूपाणि व्यवहारे पर्याप्तानि भवन्ति । तैः चतुर्भिः एव रूपैः वयं सर्वविधम् अपि आशयं प्रकाशयितुं शक्नुमः ।

एवं चेत् 'आवां गच्छावः' इत्यभिप्रायः कथं वक्तव्यः इति चेत् 'वयं गच्छामः' इत्येव उत्तरम् । एतादृशाः प्रयोगाः (यत्र द्वयोः गमनं वक्तव्यम् अस्ति तत्रापि बहुवचनस्य प्रयोगः) संस्कृतसाहित्ये, विशिष्य नाटकादिषु विपुलतया दृश्यते । अतः तथा प्रयोगः न दोषाय ।

अन्यच्च सरलसंस्कृतं यदा अभ्यस्तं भवति, जनमानसे रूढं च भवति तदनन्तरं तु अपेक्षायां सत्यां द्विवचनस्य, मध्यमपुरुषस्य वा पाठनं कर्तुं शक्यते एव । तदा तयोः पाठने अधिकः क्लेशः अपि न भवेत् । केवलं प्राथमिकस्तरे यत्र च सरलसंस्कृतस्य एव प्रयोगः करणीयः अस्ति तत्र एतयोः परिहारः करणीयः इत्येव अस्माकम् आशयः ।

### २.३.१.५. विभक्तिविषये सारल्यम्

विभक्तिप्रत्ययान्तेन यः अर्थः बोध्येत सः एव अर्थः क्वचित् अव्ययेन अपि बोध्यते । तादृशे अवसरे अव्ययस्य उपादानमेव श्रेयसे । तद्यथा - 'तः' इत्येतत् पञ्चम्यर्थे प्रयोक्तुं शक्यम् । यथा - ग्रामतः, विद्यालयतः, शालातः, आपणतः, नदीतः, नगरतः, काशीतः, वृक्षतः इत्येवमादयः । तदा तु अन्त-लिङ्गादिकारणतः यः रूपभेदः स्यात् सः निवारयितुं शक्यः, येन प्रयोक्त्रा यथा सारल्यम् अनुभूयेत तथैव अवगन्त्रा अपि क्लेशं विना अर्थः अवगम्येत । प्रातिपदिकात् तसिल्, तस् वा तत्र । (सर्वनामशब्देभ्यः तसिल् विहितः । तद्भिन्नेभ्यः तस् । तस् तु 'आद्यादिभ्यः तस्' इति वार्तिकेन) 'शालायाः' इत्यस्य श्रवणात् पञ्चमी उत षष्ठी इति भ्रमः । 'तः' इत्यस्य योगे तु स्पष्टता ।

एवमेव निमित्तार्थे 'कृते' इत्यस्य प्रयोगः भवितुम् अर्हति । (ततः पूर्वं षष्ठ्यन्तं पदं प्रयोक्तव्यम् )

### २.३.१.६. भूलकालार्थे कृदन्तप्रयोगः

भूतकालार्थं बोधयितुं सामान्यतः लङ्लकारस्य प्रयोगः क्रियते ।

यथा - पठधातुः -

| | | |
|---|---|---|
| अपठत् | अपठताम् | अपठन् |
| अपठः | अपठतम् | अपठत |
| अपठम् | अपठाव | अपठाम |

एषु नवसु रूपेषु पूर्वं यथा सूचितं तथा द्विवचनस्य मध्यमपुरुषस्य च परिहारः कृतः चेत् अपि 'अपठत्, अपठन्, अपठम्, अपठाम' इत्येतेषां चतुर्णां रूपाणां प्रयोगः क्रियते । परन्तु प्राथमिकाः अभ्यासिनः सर्वेषां धातूनाम् (कृ-करोति, श्रु-शृणोति, ग्रह-गृह्णाति, ज्ञा-जानाति इत्यादीनाम्) एतेषां रूपाणां ज्ञाने प्रयोगे च क्लेशम् अनुभवन्ति । अन्यच्च धातुः यदि उपसर्गसहितः भवति तर्हि तु इतोऽपि अधिकः क्लेशः भवति । यतः तत्र लङ्लकारे धातोः पूर्वम् अडागमः भवति । सः आगमः उपसर्गात् अनन्तरं धातोः पूर्वं च भवति । तत्र पुनः सन्धेः अवसरः अस्ति चेत् सन्धिः अपि अवश्यमेव करणीयः भवति ।

यथा -

| **लट्लकारः** | **लङ्लकारः** | |
|---|---|---|
| गच्छति | अगच्छत् | |
| आगच्छति | आ + अगच्छत् | = आगच्छत् । |
| प्रतिगच्छति | प्रति + अगच्छत् | = प्रत्यगच्छत् । |
| अनुगच्छति | अनु + अगच्छत् | = अन्वगच्छत् । |
| अवगच्छति | अव + अगच्छत् | = अवागच्छत् । |
| निर्गच्छति | निर् + अगच्छत् | = निरगच्छत् । |
| निश्चिनोति | निस् + अचिनोत् | = निरचिनोत् । |

एतां प्रक्रियाम् अजानन्तः प्राथमिकाः अभ्यासिनः तत्र बहुधा दोषं कुर्वन्ति । अप्रतिगच्छत्, अनिर्गच्छत् ... इत्येवम् अपशब्दप्रयोगं कुर्वन्ति । अन्यच्च प्रत्यगच्छत्, अन्वगच्छत्, अन्वसरत्, प्रादर्शयत्, अङ्ग्यकरोत्, निरचिनोत् इत्यादीनां रूपाणाम् अर्थावगमने अपि ते क्लेशम् अनुभवन्ति । (निश्चिनोति - निरचिनोत् इत्यत्र तु अधीतशास्त्राणाम् अपि सन्देहः स्यात् - निसचिनोत् उत निरचिनोत् इति । वस्तुतः तु निरचिनोत् इत्येव साधु रूपम् )

एतस्य क्लेशस्य परिहाराय अस्माभिः सरलसंस्कृते लङ्लकारस्य प्रयोगः एव परिहर्तुं शक्यते । तर्हि भूतकालार्थः कथं वक्तव्यः ? इति चेत् 'क्तवतु' इत्यस्य भूतकृदन्तस्य प्रयोगेण वक्तव्यः । 'क्तवतु'प्रत्यययोगेन पुंलिङ्गे गतवान्, पठितवान्, स्थितवान् इत्यादीनि रूपाणि, स्त्रीलिङ्गे गतवती, पठितवती, स्थितवती इत्यादीनि रूपाणि, नपुंसकलिङ्गे गतवत्, स्थितवत्, पतितवत् इत्यादीनि रूपाणि च सिद्धानि भवन्ति । उपसर्ग-सहितधातूनाम् अपि क्तवतुप्रत्ययान्तानि रूपणि सरलानि एव । तानि उपसर्गरहितधातूनां क्तवतुप्रत्ययान्तरूपाणि एव अनुसरन्ति । यथा - गतवान् इव आगतवान्, प्रतिगतवान्, अनुगतवान्, निर्गतवान्, अवगतवान् इत्यादीनि ।

अतः कृदन्तस्य प्रयोगेण महत् सारल्यं सिद्धं भवति इत्यत्र संशयः नास्ति । किन्तु लकाररूपस्य प्रयोगे लिङ्गत्रये अपि समानम् एव रूपं प्रयोक्तुं शक्यते, अतः तत्र एव सारल्यम् अधिकं खलु इति काचित् आशङ्का भवितुम् अर्हति । यद्यपि तत् सत्यम्, तथापि लङ्लकारप्रयोगे प्रथमपुरुष-उत्तमपुरुषयोः रूपेषु पुनः भेदः भवति । यथा - सः अगच्छत्, अहम् अगच्छम् । सः अपि प्रयोक्त्रा ज्ञातव्यः भवति । किन्तु क्तवतुप्रत्ययान्तस्य प्रयोगे सा समस्या नास्ति । यथा - सः गतवान्, अहं  गतवान् । अतः अत्र एव सारल्यम् अधिकम् इति निर्णेतुं शक्यते । सोपसर्गधातुप्रयोगे महान् क्लेशः इति तु पूर्वमेव उक्तम् ।

**२.३.१.७. चत्वारः एव लकाराः**

लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् चेति दश लकाराः संस्कृते प्रसिद्धाः सन्ति । तेषु लेट्लकारः वेदमात्रे प्रयोगम् अर्हति । लोकव्यवहारे तस्य प्रयोगः नास्ति । तथापि लिङ्लकारः विधिलिङ् आशीर्लिङ् चेति द्विप्रकारकः अस्ति इत्यतः आहत्य व्यवहारे अपि दश लकाराः भवन्ति एव । एवं चेत् एकस्य धातोः कर्तरि दशसु लकारेषु आहत्य नवतिः (९०) रूपाणि भवन्ति ।

यथा - डु कृञ् करणे इति धातोः परस्मैपदे रूपाणि एवं भवन्ति -

| | | |
|---|---|---|
| | लट्लकारे | |
| करोति | कुरुतः | कुर्वन्ति |
| करोषि | कुरुथः | कुरुथ |
| करोमि | कुर्वः | कुर्मः |
| | लिट्लकारे | |
| चकार | चक्रतुः | चक्रुः |
| चकर्थ | चक्रथुः | चक्र |
| चकार, चकर | चकृव | चकृम |

| | | |
|---|---|---|
| | लुट्लकारे | |
| कर्ता | कर्तारौ | कर्तारः |
| कर्तासि | कर्तास्थः | कर्तास्थ |
| कर्तास्मि | कर्तास्वः | कर्तास्मः |
| | लृट्लकारः | |
| करिष्यति | करिष्यतः | करिष्यन्ति |
| करिष्यसि | करिष्यथः | करिष्यथ |
| करिष्यामि | करिष्यावः | करिष्यामः |
| | लोट्लकारः | |
| करोतु-कुरुतात् | कुरुताम् | कुर्वन्तु |
| कुरु-कुरुतात् | कुरुतम् | कुरुत |
| करवाणि | करवाव | करवाम |
| | लङ्लकारे | |
| अकरोत् | अकुरुताम् | अकुर्वन् |
| अकरोः | अकुरुतम् | अकुरुत |
| अकरवम् | अकुर्व | अकुर्म |
| | विधिलिङ्लकारे | |
| कुर्यात् | कुर्याताम् | कुर्युः |
| कुर्याः | कुर्यातम् | कुर्यात |
| कुर्याम् | कुर्याव | कुर्याम |
| | आशीर्लिङ्लकारे | |
| क्रियात् | क्रियास्ताम् | क्रियासुः |
| क्रियाः | क्रियास्तम् | क्रियास्त |
| क्रियासम् | क्रियास्व | क्रियास्म |
| | लुङ्लकारे | |
| अकार्षीत् | अकार्ष्टम् | अकार्षुः |
| अकार्षीः | अकार्ष्टम् | अकार्ष्ट |
| अकार्षम् | अकार्ष्व | अकार्ष्म |
| | लृङ्लकारे | |
| अकरिष्यत् | अकरिष्यताम् | अकरिष्यन् |
| अकरिष्यः | अकरिष्यतम् | अकरिष्यत |

अकरिष्यम्     अकरिष्याव     अकरिष्याम ।

अयम् उभयपदी इत्यतः आत्मनेपदरूपाणि अपि (कुरुते, चक्रे, कर्ता (कर्तासि), करिष्यते, कुरुताम्, अकुरुत, कुर्वीत, कृषीष्ट, अकृत, अकरिष्यत इत्यादीनि) नवतिसङ्ख्याकानि भवन्ति । यद्यपि कर्मणि पुनः नवतिः रूपणि भवन्ति, तथापि अत्र कर्तरिरूपाणाम् एव परिगणना कृता अस्ति । एतेषु रूपेषु पूर्वोक्तप्रकारेण द्विवचनस्य मध्यमपुरुषस्य च परिहारः कृतः चेत् अपि ४० + ४० रूपाणि तु शिष्यन्ते एव । प्रत्येकम् अपि धातोः एतावतां रूपाणां ज्ञानं स्मरणं प्रयोगः वा सामान्येन जनेन न शक्यते एव । अतः सरलसंस्कृते एतेषु केचन लकाराः परिहर्तुं शक्यन्ते ।

यथा - भविष्यदर्थे लृट्लकारः, लुट्लकारः च भवतः । वयं भविष्यदर्थे  लृट्लकारम् एव स्वीकुर्मः, न तु लुट्लकारम् । सः भविष्यत्सामान्ये विहितः, लुडर्थस्य अपि सङ्ग्राहकः । भूतकालार्थे लङ्लकारः, लुङ्लकारः, लिट्लकारः चेति त्रयः लकाराः सम्भवन्ति । वयं भूतकालार्थं क्तवतुप्रत्ययान्तस्य प्रयोगेण वदामः इत्यतः तस्मिन् अर्थे एतेषां त्रयणाम् अपि लकाराणां परिहारः कर्तुं शक्यते । प्रार्थनादिकम् अर्थं बोधयितुं लोट्लकारस्य आवश्यकता भवति । विध्यर्थं बोधयितुं विधिलिङ्लकारः अपि स्वीकर्तुं शक्येत । एवं क्रियते चेत् तदा लट्, लृट्, लोट्, विधिलिङ् (प्रगतस्तरे) इत्येतैः चतुर्भिः एव लकारैः वयं सर्वम् अपि व्यवहारं निर्वर्तयितुं शक्नुयाम । लृङ्लकारस्य अर्थमपि लिङ्लकारस्य प्रयोगेण वक्तुं शक्नुमः । यथा -

यदि भवान् आगमिष्यत् तर्हि अहं धनम् अदास्यम् । (लृङ्लकारस्य प्रयोगः)

यदि भवान् आगच्छेत् तर्हि अहं धनं दद्याम् । (विधिलिङ्लकारस्य प्रयोगः)

यद्यपि अनयोः तात्पर्यभेदः अस्ति, तथापि स अल्पः भेदः प्रगतस्तरपर्यन्तं न परिगणनीयः । लृङ्लकारस्य प्रयोगाः अपि अत्यन्तं विरलाः । किन्तु तत्र भूते वा भाविनि वा अस्य प्रयोगः इति निर्धारणाय पूर्वापरसन्दर्भः परिशीलनीयः । सन्दरर्भपरिशीलने सति विधिलिङ्प्रयोगेनापि तात्पर्यम् अवगन्तुं शक्यम् । किञ्च क्तवतुप्रत्ययान्तरूपेण सह असधातोः विधिलिङ्लकाररूपस्य प्रयोगेण अपि एतम् आशयं वक्तुं शक्नुमः । यथा - यदि भवान् आगतवान् स्यात् तर्हि अहं दत्तवान् स्याम् ।

एवं यदि क्रियेत तर्हि चतुर्णां लकाराणां चतुर्भिः रूपैः चेति मिलित्वा षोडशभिः रूपैः कृदन्तरूपैः च समस्तं व्यवहारं साधयितुं प्रभवामः ।

### २.३.१.८. चितानां धातूनाम् एव प्रयोगः

पाणिनिमतानुसारेण संस्कृते प्रायः २००० धातवः सन्ति । एषु बहवः धातवः समानार्थकाः । ते च धातवः भ्वादिः, अदादिः, जुहोत्यादिः दिवादिः, स्वादिः, तुदादिः, रुधादिः, तनादिः, क्र्यादिः, चुरादिः इत्येवं दशसु गणेषु विभक्ताः सन्ति । तत्तद्गणस्य विकरणप्रत्ययम् अवलम्ब्य प्रत्येकं गणस्य धातूनां रूपाणि भिन्नानि भवन्ति । एवं भिन्नानां रूपाणां ज्ञानं स्मरणं चापि महते क्लेशाय एव । अतः तद्विषये सरलसंस्कृतदृष्ट्या एवं निश्चेतुं शक्यते -

- आत्मनेपदिधातूनाम् अपेक्षया परस्मैपदिधातूनां प्रयोगः सुकरः । अतः परस्मैपदिनः धातवः एव प्रयोक्तव्याः ।

- परस्मैपदिषु धातुषु अपि व्यवहारे येषाम् अत्यन्तम् उपयोगः भवति तादृशाः चत्वारिंशत् पञ्चाशत् वा धातवः चेतव्याः। तेषाम् एव प्रयोगः करणीयः परमप्राथमिकस्तरे। अत्यन्तम् अनिवार्याः परिमितसंख्याकाः केचन एव आत्मनेपदिधातवः अपि स्वीकर्तुं शक्यन्ते प्रगतस्तरे।
- भ्वादिगणीयानां (भवति), दिवादिगणीयानां (दीव्यति), तुदादिगणीयानां (तुदति), चुरादिगणीयानां (चोरयति) च धातूनां रूपेषु प्रायः समानता अस्ति। तेषु यस्य कस्यापि एकस्य धातोः रूपाणि ज्ञातानि चेत् अन्येषां सर्वेषाम् अपि रूपाणि ज्ञातानि भवन्ति। अतः एतेभ्यः चतुर्भ्यः एव गणेभ्यः धातवः चेतव्याः।

एवं चेतुं योग्याः धातवः एते भवितुम् अर्हन्ति -

१. भ्वादिगणीयाः (परस्मैपदिनः धातवः)

| | | |
|---|---|---|
| भू सत्तायाम् | - | भवति |
| खादृ भक्षणे | - | खादति |
| अर्च पूजायाम् | - | अर्चति |
| गम्लृ गतौ | - | गच्छति |
| गर्ज शब्दे | - | गर्जति |
| अट गतौ | - | अटति |
| दृशिर् प्रेक्षणे | - | पश्यति |
| इष इच्छायाम् | - | इच्छति |
| त्यज हानौ | - | त्यजति |
| पठ व्यक्तायां वाचि | - | पठति |
| क्रीडृ विहारे | - | क्रीडति |
| चर गतिभक्षणयोः | - | चरति |
| जि जये | - | जयति |
| रक्ष पालने | - | रक्षति |
| हसे हसने | - | हसति |
| ज्वल दीप्तौ | - | ज्वलति |
| स्मृ चिन्तायाम् | - | स्मरति |
| धृञ् धारणे | - | धरति |
| णीञ् प्रापणे | - | नयति |
| पा पाने | - | पिबति |
| ष्ठा गतिनिवृत्तौ | - | तिष्ठति |
| श्रु श्रवणे | - | शृणोति |
| दंश दशने | - | दशति |

वद व्यक्तायां वाचि - वदति

६. तुदादिगणीयाः

मिल श्लेषणे - मिलति

लिख अक्षरविन्यासे - लिखति

प्रच्छ ज्ञीप्सायाम् - पृच्छति

विश प्रवेशने - (प्र)विशति, (उप)विशति

१०. चुरादिगणीयाः

चुर स्तेये - चोरयति

पीड अवगाहने - पीडयति

तड आघाते - ताडयति

चिति स्मृत्याम् - चिन्तयति

पूज पूजायाम् - पूजयति

क्षल शौचकर्मणि - क्षालयति

गण संख्याने - गणयति

एतान् अतिरिच्य अन्यगणेभ्यः केचन एव धातवः स्वीकर्तव्याः भवन्ति । यथा -

अदादिगणतः - अस भुवि - अस्ति

रुदिर् अश्रुविमोचने - रोदिति

('रोदिति' इत्यत्र यदि क्लेशः तर्हि 'रोदनं करोति' इत्यपि प्रयोक्तुं शक्यम् ।)

जुहोत्यादिगणतः - डु दाञ् दाने - ददाति

स्वादिगणतः - आप्लृ व्याप्तौ - आप्नोति

तनादिगणतः - डु कृञ् करणे - करोति

क्र्यादिगणतः - डु क्रीञ् द्रव्यविनिमये - क्रीणाति

ग्रह उपादाने - गृह्णाति

ज्ञा अवबोधने - जानाति

व्यवहारे अत्यन्तम् उपयोगिनाम् अन्येषां बहूनां धातूनाम् अर्थं तेषां धातूनां लकाररूपाणां प्रयोगम् अकृत्वा अपि तत्तद्धातोः ल्युट्-प्रत्ययान्तरूपेण सह 'करोति' इत्यस्य उपयोगेन निरूपयितुं शक्नुमः । यथा -

वदि अभिवादनस्तुत्योः - वन्दते - वन्दनं करोति ।

यती प्रयत्ने - यतते - यत्नं करोति ।

मन्थ विलोने - मन्थति /मथ्नाति - मन्थनं करोति ।

श्लाघृ कथने - श्लाघते - श्लाघनं करोति ।

जल्प व्यक्तायां वाचि - जल्पति - जल्पनं करोति ।

| | | | | |
|---|---|---|---|---|
| क्रमु पादविक्षेपे | - | क्राम्यति | - | क्रमणं करोति । |
| मील निमेषणे | - | मीलति | - | मीलनं करोति । |
| भाष व्यक्तायां वाचि | - | भाषते | - | भाषणं करोति । |
| चर्व अदने | - | चर्वते | - | चर्वणं करोति । |
| टु याचृ याच्ञायाम् | - | याचति | - | याचनं करोति । |
| ध्यै चिन्तायाम् | - | ध्यायति | - | ध्यानं करोति । |
| तॄ प्लवनतरणयोः | - | तरति | - | तरणं करोति । |
| ह्वेञ् स्पर्धायां शब्दे च | - | (आ)ह्वयति | - | आह्वानं करोति । |
| दुह प्रपूरणे | - | दोग्धि | - | दोहनं करोति । |
| शीङ् स्वप्ने | - | शेते | - | शयनं करोति । |
| षिवु तन्तुसन्ताने | - | सीव्यति | - | सीवनं करोति । |
| नृती गात्रविक्षेपे | - | नृत्यति | - | नर्तनं करोति । |
| लिप उपदेहे | - | लिम्पति | - | लेपनं करोति । |
| षिच क्षरणे | - | सिञ्चति | - | सेचनं करोति । |
| भिदिर् विदारणे | - | भिनत्ति | - | भेदनं करोति । |
| छिदिर् द्वैधीकरणे | - | छिनत्ति | - | छेदनं करोति । |
| बन्ध बन्धने | - | बध्नाति | - | बन्धनं करोति । |
| पुष पुष्टौ | - | पुष्णाति | - | पोषणं करोति । |
| अर्थ उपयाच्ञायाम् | - | (प्र)अर्थयते | - | प्रार्थनं करोति । |

एवमेव व्यवहारे अत्यन्तम् उपयोगिनाम् पुनः केषाञ्चित् धातूनाम् अर्थम् अपि तेषां लकाररूपाणाम् उपयोगम् अकृत्वा तत्तद्धातोः क्तप्रत्ययान्तेन रूपेण सह 'भवति' इत्यस्य उपयोगेन निरूपयितुं शक्नुमः । यथा -

| | | | | |
|---|---|---|---|---|
| फल निष्पत्तौ | - | फलति | - | फलितः भवति । |
| ञि भी भये | - | बिभेति | - | भीतः भवति । |
| पुष्प विकसने | - | पुष्प्यति | - | पुष्पितः भवति । |
| खिद दैन्ये | - | खिद्यते | - | खिन्नः भवति । |
| शुष शोषणे | - | शुष्यति | - | शुष्कः भवति । |
| तुष प्रीतौ | - | तुष्यति | - | तुष्टः भवति । |
| क्रुध क्रोधे | - | क्रुध्यति | - | क्रुद्धः भवति । |
| शुध शौचे | - | शुध्यति | - | शुद्धः भवति । |

| | | | | |
|---|---|---|---|---|
| षिधु संराद्धौ | - | सिध्यति | - | सिद्धः भवति । |
| णश अदर्शने | - | नश्यति | - | नष्टः भवति । |
| शमु उपशमे | - | शाम्यति | - | शान्तः भवति । |
| श्रमु तपसि खेदे च | - | श्राम्यति | - | श्रान्तः भवति । |

एवं च परिमितसंख्याकानाम् एव धातूनां चतुर्णां लकाराणां रूपैः, पुनः केषाञ्चित् चितानां धातूनां ल्युट्प्रत्ययान्तरूपैः क्तप्रत्ययान्तरूपैः करोति-भवत्योः अनुप्रयोगेण च वयं सर्वम् अपि व्यवहारं सम्पादयितुं शक्नुमः ।

सरलसंस्कृतविषये अवधातव्याः अन्ये केचन अंशाः एवं सन्ति –

### २.३.२ अल्पप्रगतस्तरः

अस्मिन् स्तरे पूर्वोक्ताः (परमप्राथमिकस्तरे उक्ताः) सर्वे नियमाः अन्विताः भवन्ति एव । तान् अतिरिच्य स्थिताः केचन बिन्दवः यथा – विधिलिङ्लकारः – सम्भावनायां विध्यर्थे, लृङर्थे चेति बहुषु अवसरेषु अस्य लकारस्य प्रयोगः भवितुम् अर्हति । एतस्य रूपमपि नातिकठिनम् । (सार्वधातुकत्वात्) अतः एतस्मिन् स्तरे अस्य प्रयोगः भवितुम् अर्हति ।

- अजन्तेषु - ऋकारान्तः पुंलिङ्गः, ऋकारान्तः स्त्रीलिङ्गः, इकारान्त-उकारान्तौ पुंसि स्त्रियां च
- हलन्तेषु - तकारान्तस्य प्रयोगः भवितुम् अर्हति । अन्तभेदे सत्यपि हलन्तेषु रूपसाम्यं भवति बहुधा । अतः एकस्य शब्दस्य सादृश्येन अन्येषां रूपाणाम् अभ्यूहनं न क्लेशाय ।
- शत्रन्त-शानजन्तयोः प्रथमाविभक्तौ प्रयोगः (पुं. स्त्री.नपु)
- प्रथमे, चतुर्थे, षष्ठे, दशमे च गणे अन्तर्भूतानां २०-३० धातूनां प्रयोगः ।

### २.३.३. प्रगतस्तरः

एतं स्तरं प्राप्तवन्तः संस्कृताभ्यासिनः संस्कृतभाषया एव सर्वान् भावान् प्रकाशयितुं समर्थाः भवन्ति एव । अतः एतस्मिन् स्तरे तेषां ज्ञानस्य विस्ताराय प्रयासः करणीयः । तस्मात् पुनरपि केषाञ्चित् धातूनां परिचयः कारयितुं शक्यः । कर्मणिप्रयोगः वर्तमाने विध्यर्थे तव्यदन्त-अनीयरन्तयोः परिचयः च ज्ञापयितुं शक्यः । युष्मच्छब्दः, मध्यमपुरुषः, द्विवचनम् इत्यादीनां परिचयः अपि अस्मिन् स्तरे भवितुम् अर्हति ।

### २.३.४.१. लघूनां वाक्यानां प्रयोगः

सरलसंस्कृते यावच्छक्यं लघूनां वाक्यानाम् एव प्रयोगः करणीयः । यतः वाक्यं यथा यथा दीर्घं भवति तथा तथा अर्थावगमने क्लेशः अधिकः भवति । वाक्यानां संख्या अधिका भवतु नाम, चिन्ता न करणीया, परन्तु तानि ह्रस्वानि भवेयुः ।

### २.३.४.२. सन्ध्यादिविषये व्यवस्था - सन्धिविरहितं वाक्यम्

संस्कृतभाषया व्यवहारसमये प्राथमिकस्तरे सन्धिः करणीयः उत न इति पृच्छन्ति बहवः । 'प्राथमिकस्तरे न करणीयः' इति अस्माकं मतम् ।

संहितैकपदे नित्या नित्या धातूपसर्गयोः
नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते"

इति वचनं तावत् सुप्रसिद्धम् । वाक्ये सन्धिः विवक्षाधीनः । अतः सन्धिविरहितस्य वाक्यस्य प्रयोगः कृतः चेदपि न दोषः । सन्धिरहिता शैली अपि सारल्यस्य कारणम् । सन्धियुक्तस्य वाक्यस्य पदच्छेदे कष्टम् अनुभवन्तः नूतनाः चिन्तयन्ति यत् संस्कृतं कठिनम् इति । यद्यपि काठिन्यं वाक्यशैलीगतं, तथापि तत् आरोप्यते भाषायाम् । अतः संस्कृतं सरलम् इत्यस्य भावस्य जागरणार्थं सन्धिविरहिता एव शैली आश्रयणीया । किन्तु लोके यत्र अप्रयत्नेन सन्धिः क्रियते तत्र सन्धियुक्ताः शब्दाः तथैव प्रयोक्तव्याः । तन्नाम तत्रापि सन्धेः निवारणाय प्रयासः करणीयः नास्ति ।

कानिचन उदाहरणानि यथा - नास्ति, तथापि, कोऽपि, तत्रैव, तथैव, मास्तु, नावश्यकम्, नैव, एवमेव, इत्यादयः, इत्यपि, तन्नाम, इत्युक्ते, इत्येवम्, कदाचिदपि, कदाचिदेव, क्वचिदेव, इदानीमेव....

एतेषु सर्वेषु अपि उदाहरणेषु पदद्वयम् अस्ति इति तु स्फुटम् । पदयोः सन्धिः । लोके सन्धियुक्ततया एव प्रायः प्रयोगः एतेषाम् । अयमेव उच्यते - 'अप्रयत्नेन कृतः सन्धिः' इति । एतेषां प्रयोगावसरे सन्धिविच्छेदः (न अस्ति, तथा अपि, कः अपि इत्येवम् ......) करणीयः नास्ति ।

वाक्ये सर्वत्र यदि सन्धिः क्रियते तर्हि तत् वाक्यं कठिनं स्यात् ।

यथा - विद्यालयेऽस्मिन् ममाप्येकश्छात्रोऽध्ययनङ्करोति ।

इत्येतत् सन्धिभूयिष्ठम् अस्ति । एतदेव – 'विद्यालये अस्मिन् मम अपि एकः छात्रः अध्ययनं करोति' इति सन्धिरहिततया प्रयुक्तं चेत् श्रोतारः सुखेन अवगन्तुं शक्नुवन्ति ।

उदाहरणान्तरं यथा - तथाप्यहमिदानीमागन्तुमशक्नुवन्निवेदयितुमिच्छामि यत्.....

अत्र पदविभागः कथं करणीयः इत्यत्र विज्ञाः अपि क्लेशम् अनुभवेयुः । द्विवारं पठित्वा पदानि पृथक् कुर्युः ते । एवं स्थिते प्राथमिकस्तरीयाणां का कथा ? एतदेव वाक्यं - 'तथापि अहम् इदानीम् आगन्तुम् अशक्नुवन् निवेदयितुम् इच्छामि यत्' इति यदि लिख्यते तर्हि पठिता विना क्लेशं पठेत् । 'इत्युक्त्वाग्रिमकार्येऽ भवदुद्युक्तः' इत्येतत् एव वाक्यं सन्धिरहिततया 'इति उक्त्वा अग्रिमकार्ये अभवत् उद्युक्तः' इति यदि लिख्येत तर्हि महत् आनुकूल्यं स्यात् एव ननु ?

वाक्ये यदि सन्धिः क्रियेत तर्हि अन्तादिज्ञाने बहुत्र क्लेशः स्यात् अपि । यथा - 'कार्यक्रमा जाता इति । ' अत्र उभयत्र आकारान्तता उत विसर्गलोपः इति सन्देहः स्यात् । 'एतच्छ्रुत्वा' (एतत् श्रुत्वा) इत्यादिषु पदविभागः कीदृशः स्यात् इति ज्ञातुं कष्टम् अनुभवेयुः सामान्याः ।

अन्यच्च, ये सर्वान् सन्धीन् जानीयुः ते एव पठन्ति लिखन्ति वदन्ति च इति न । ये सन्धीन् न अधीतवन्तः तेऽपि पठने सम्भाषणे वा प्रवृत्ताः भवेयुः । वाक्ये सन्धिः कृतः चेत् तादृशाः महत् कष्टम् अनुभवेयुः । संस्कृतं जनभाषा स्यात् इति अपेक्षा यदि स्यात् तर्हि सरलाः एव नियमाः अनुसरणीयाः प्राथमिके स्तरे । येषां नियमानाम् अनुसरणं विनापि संस्कृतेन व्यवहारः शक्यः ते नियमाः निवारणीयाः इति तु पूर्वम् उक्तम् एव ।

संस्कृतं कठिनम् इति भावः अद्य यदि केषाञ्चित् मनसि स्यात् तर्हि तत्र सन्धिसमासादीनि अपि कारणभूतानि एव । यः सामान्यम् अर्थं ज्ञातुम् इच्छति सः यदि अन्वयादिषु एव महान्तं क्लेशम् अनुभवेत् तर्हि संस्कृताध्ययनं न अनुवर्तयेत् एव । सरलं मुखं दर्शितं चेदेव तस्य उत्साहः वर्धेत, सः संस्कृताध्ययने अग्रे प्रवर्तेत च ।

### २.३.४.३. कर्तरिप्रयोगस्य आधिक्येन उपयोगः

कर्तरिप्रयोगः, कर्मणिप्रयोगः, भावेप्रयोगः च इति त्रयः प्रयोगाः संस्कृतभाषायां प्रसिद्धाः सन्ति । संस्कृते तु तेषां त्रयाणाम् अपि प्रायः समानतया उपयोगः भवति । संस्कृतज्ञैः प्रायः कर्मणिप्रयोगः आधिक्येन क्रियते । (यथा पूर्वतने वाक्ये !) अभ्यासवशात् संस्कारवशात् वा सर्वे अपि संस्कृतज्ञाः कर्मणिप्रयोगम् एव आधिक्येन कुर्वन्ति । किन्तु इदम्प्रथमतया ये संस्कृतं शृण्वन्ति, अभ्यासं वा कुर्वन्ति, ते प्रत्येकम् अपि संस्कृतवाक्यं स्वमातृभाषानिबद्धेन वाक्येन तुलयन्ति । तस्यां मातृभाषायां तु कर्मणिप्रयोगः विरलतया एव प्रयुज्यते । अतः तयोः वाक्ययोः विन्यासे समानतां यदा न पश्यन्ति तदा ते अवश्यमेव भ्रान्ताः भवन्ति । एतस्य परिहारार्थम् अस्माभिः सरलसंस्कृते कर्तरिप्रयोगः एव आधिक्येन करणीयः । कर्मणिप्रयोगः भावेप्रयोगः वा कादाचित्कतया प्रयोक्तुं शक्यः । किन्तु आधिक्येन तु कर्तरिप्रयोगः एव करणीयः ।

### २.३.४.४. अन्वयानुसारेण वाक्यप्रयेगः

'रामः गृहं गच्छति' इत्यत्र आदौ कर्तृपदं, ततः कर्मपदम्, अन्ते क्रियापदं च अस्ति । प्रायः एषा आनुपूर्वी प्रादेशिकभाषासु अपि दृश्यते । संस्कृते अपि एतस्याः एव शैल्याः अनुसरणात् अवगमनं सुकरं भवति ।

संस्कृतभाषायां कारकव्यवस्थायाः प्राधान्यात् पदानां स्थानपरिवर्तने कृते अपि अर्थस्य न कापि हानिः । 'गृहं गच्छति रामः' 'गच्छति गृहं रामः' 'गच्छति रामः गृहम्....' इति कथञ्चित् वाक्यं प्रयुज्येत चेदपि अर्थः तु समानः । सर्वत्रापि रामः एव कर्ता, गृहमेव कर्म, गमनम् एव क्रिया । किन्तु आङ्ग्लभाषायाम् एवं नास्ति । Rama killed Ravana इति वाक्ये रामः कर्ता, रावणः कर्म । अत्र रामरावणपदयोः स्थानपरिवर्तनात् कर्तृकर्मणोः अपि परिवर्तनं भवति । अतः Ravana killed Rama इति यदि उच्यते तर्हि तत्र रावणः कर्ता, रामः कर्म स्यात् ।

कर्तृकर्मादीनां स्थानस्य अनियतत्वात् श्लोकादिषु पदानि छन्दसः अनुगुणं यत्रक्वचिदपि निवेश्यन्ते । ततः अन्वयं कृत्वा अर्थः अवगम्यते पाठकेन । एवं न करणीयं सामान्ये व्यवहारे । अन्यासु प्रादेशिकभाषासु यथा कर्ता आदौ, कर्म ततः, अन्ते क्रिया च उच्यते तथैव आचरणीयम् अस्माभिः ।

संस्कृतभाषायां 'न'कारः वाक्यादौ प्रयुज्यते बहुत्र । यथा - 'न सर्वोऽपि देशः भ्रष्टाचारमयः जातः इति भावयामः वयम् । ' एतादृशेषु वाक्येषु (नञ्) 'न'कारस्य अन्वयः 'भावयामः' इत्यनेन सह । अतः 'न भावयामः' इति आशयः । किन्तु क्वचित् वाक्यादौ कृतं नकारप्रयोगं विस्मृत्य अर्थः गृह्यते । तदा विपरीतार्थप्रतीतिः भवितुम् अर्हति । अतः प्राथमिके स्तरे एतादृशी शैली न आश्रयणीया । अन्वयानुसारेण एव पदानां प्रयोगे अर्थावगमः स्फुटः भवेत् ।

### २.३.४.५. प्रयोगः

कर्तरिप्रयोगः कर्मणिप्रयोगः, भावेप्रयेगः चेति प्रयोगाः त्रिप्रकारकाः । प्राथमिके स्तरे 'कर्तरिप्रयोगः' एव करणीयः । यतः प्रादेशिकभाषायां सः एव दृश्यते आधिक्येन । यद्यपि संस्कृतभाषायां कर्मणिप्रयोगस्य प्राचुर्यं, तथापि कर्तरिप्रयोगस्य एव अनुसरणं वरम् । यथा -

अहं गृहं गच्छामि ।

सः गृहं गच्छति ।

सः गृहं गतवान् ।

सा पाठं पठितवती ।

### २.३.४.६. समासः

सन्धिविषये या नीतिः, सा एव नीतिः समासविषये अपि । तन्नाम अप्रयत्नेन यत्र समासः स्यात् तत्र एव समस्तपदानि प्रयोक्तव्यानि । तदन्यत्र व्यस्तप्रयोगः एव करणीयः प्राथमिकस्तरे । महाराजः, प्रधानमन्त्री, मुख्यमन्त्री, कुलपतिः, महानगरम्, स्वतन्त्रतादिवसः, कार्यालयः, मन्त्रालयः इत्यादीनि नामपदत्वेन अतीव प्रसिद्धानि समस्तपदानि तु तथैव स्वीकर्तव्यानि ।

अप्रयत्नेन समासस्य उदाहरणानि यथा -

देवालयः, दिनदर्शिका, शिलामण्डपः, संस्कृतप्रचारः, दण्डदीपः, वर्णलेखनी, देवपूजा, पाकशाला, वित्तकोषः, मासिकपत्रिका, विश्वविद्यालयः, सेवासंस्था, न्यायाधीशः, उद्यानपालकः, क्रीडाङ्गणम्, श्वासकोषः, रथोत्सवः, वृषभशकटः, भूगोलम्, धूमकेतुः, करवस्त्रम्, केशसूची, स्नानगृहम्, मशकजालम्, शयनप्रकोष्ठः, प्रश्नपत्रिका, प्रयोगशाला, चलनचित्रम्, मल्लयुद्धम्, धनस्यूतः, स्नानफेनकम्, अग्निपेटिका इत्यादीनि ।

सुदीर्घाणां समस्तपदानां प्रयोगे संस्कृतकवीनां, तत्रापि गद्यकवीनां महती आसक्तिः । आधिक्येन समासानां प्रयोगः गद्यस्य लक्षणम् इत्यपि मन्यन्ते अलङ्कारशास्त्रज्ञाः । उक्तम् अस्ति यथा -

ओजः समासभूयस्त्वम् एतद् गद्यस्य जीवितम् इति ।

अतः एव बाणभट्टादयः प्रसिद्धाः गद्यकवयः स्वकृतिषु अतिदीर्घाणि समस्तपदानि प्रयुक्तवन्तः सन्ति ।

तत् तु शोभनम् एव । किन्तु ये वयं श्रोतॄणां वाचकानां च सुखेन अवगमनम् इच्छामः तैः अस्माभिः समासानां प्रयोगः अपि अत्यल्पप्रमाणेन एव करणीयः । तत्रापि प्राथमिकदशायां तु समासानां परिहारः एव वरम् ।

### २.३.४.७. विमति: निराधारा

वाक्ये सन्धे: अकरणस्य विषये केचन विमतिं प्रदर्शयन्ति । 'संहितैकपदे नित्या... सा विवक्षामपेक्षते' इति यद्यपि श्लोके उक्तं, तथापि प्राचीनग्रन्थेषु सर्वत्र सन्धियुक्तस्य एव प्रयोगस्य दर्शनात् वाक्ये अपि सन्धियुक्ता: एव प्रयोगा: करणीया: इति तेषां कथनम् ।

एकपदे समासे, श्लोकेषु च सन्धि: सर्वत्र भवतु । यत: तत्र संहिताया: नित्यत्वमेव उक्तं शास्त्रेण । किन्तु वाक्ये तु सन्धि: (संहिता) विवक्षाधीन: । अत: सन्धे: अविवक्षा कृता चेत् न कोऽपि दोष: । कालस्य आवश्यकतां मनसि निधाय, अध्येतॄणां क्लेशस्य निवारणाय, संस्कृतं सरलम् इति भावस्य जागरणाय च अयं मार्ग: आश्रयणीय: । यदि सरलस्य मार्गस्य अनुसरणे वयं संस्कृतज्ञा: मतिं न कुर्याम तर्हि संस्कृतस्य जनभाषात्वं कदापि न सिद्ध्येत्, संस्कृतस्य ह्रास: अपि अवरोद्धुं शक्य: न स्यात् च ।

सर्वत्र सन्धि: करणीय: एव इति ये वदन्ति, ते सम्भाषणे किं तं नियमम् अनुसरन्ति ? अग्रिमपदस्य आद्यवर्णम् अवलम्ब्य सन्धिकार्यं प्रवर्तते । सम्भाषणावसरे भाषणावसरे वा भावस्य प्राधान्यं भवति इत्यत: मनसि आगतानि पदानि एकैकश: उच्चार्यन्ते, न तु अग्रिमं पदं कीदृशं भवेत् इति विचिन्त्य पूर्वतनं पदं प्रयुज्यते । तादृशेषु स्थलेषु सन्धिविरहिता: एव प्रयोगा: क्रियन्ते । 'सम्भाषणादिषु क्वचित् एवं भवेत्, किन्तु लेखनावसरे तु सन्धिनियमा: अवश्यमेव अनुस्रियन्ते अस्माभि:' इति उत्तरं दद्यु: ते च इत्थं प्रष्टव्याः । लेखने वाक्ये सन्धिः अवश्यं भवेत् इति नियमः किं स्वकल्पितः, उत शास्त्रमर्यादासिद्धः इति ? शास्त्रं तु वाक्ये सन्धिकरणे अकरणे वा प्रयोक्तुः, लेखनस्य च स्वातन्त्र्यं इति वदति । प्रयोगे विसन्धिः, लेखने सन्धिः इति नियमस्तु नास्ति । स्वकल्पितस्य नियमः कथं सार्वत्रिकः स्यात् ? किञ्च एकस्मिन्नेव वाक्ये कस्मिंश्चित् भागे सन्धिः, कस्मिंश्चित् भागे विसन्धिश्च शास्त्रकृद्भिः एव कृतः इति अग्रे सोदाहरणं प्रदर्शयिष्यते । अतः आवश्यकताम् अनुसृत्य, अर्थात् सम्बोध्यमानश्रोतृगणस्य सामर्थ्यम् अनुलक्ष्य सन्धिः वा विसन्धिः वा कार्यः । सम्भाषणादिषु (केषुचित् अवसरेषु) यदि स: नियम: परित्यज्यते, तर्हि कालस्य आवश्यकतां मनसि निधाय, संस्कृतस्य प्रसाराय इतरत्रापि त्यज्यताम् । विरोध: न शास्त्रस्य, अपि तु मनस: । औदार्यम् आश्रितं चेत् संस्कृताभिवृद्ध्यर्थं महत् उपायनं दत्तं भवेत् ।

अत्र केचन वदन्ति - ”राम: गृहं गच्छति’ इति यदा उच्यते तदवसरे संहिता न विवक्षिता इति वदन्तः अपि ‘राम:’ इति पदम् उच्चार्य अविलम्बेन ‘गृहम्’ इति पदम् उच्चारयन्ति । तदवसरे अर्धमात्राकालात्मकं व्यवधानं न भवति । अतिशयितस्य सामीप्यस्य सद्भावात् अवसानाभाव: सिद्ध: । तस्मात् सन्धि: अवश्यमेव करणीय:” इति । अत्र उच्यते - ’वाक्ये तु सा विवक्षामपेक्षते’ इति वचनस्य तात्पर्यमिदम् । अस्ति शास्त्रे वाक्यसंस्कारपक्षः, पदसंस्कारपक्षः इति पक्षद्वयम् । पूर्वोक्तं वचनं वाक्यसंस्कारपक्षस्य । वाक्यसंस्कारपक्षे वाक्यस्य अङ्गभूतानि पदानि संस्क्रियन्ते । तन्नाम वाक्यघटकभूतानि कति पदानि सन्ति इति निश्चित्य अग्रिमं पदं परिशील्य पूर्वपदं संस्क्रियते । अत: तत्र संहितादिकं दृष्ट्वा सन्धिकार्यादिकं क्रियते । किन्तु पदसंस्कारपक्षे न अयं नियम: । प्रक्रियाम् अवलम्ब्य एकैकं पदं संस्क्रियते । संस्कृतानि पदानि संयोज्य वाक्यं रच्यते । अस्य तात्पर्यं यत् वाक्यसंस्कारपक्षे ‘राम:’ गृहम्’ ‘गच्छति’ इति त्रीणि अपि पदानि युगपत् एव संस्क्रियन्ते । अत: विसर्गप्राप्तित: पूर्वमेव सकारस्य रुत्वम् उत्वं च सम्भवति । अत: ’रामो गृहं गच्छति’ इति रूपं सिद्ध्यति । पदसंस्कारपक्षे तु ‘राम:’ ‘गृहम्’ ‘गच्छति’ इति त्रीणि पार्थक्येन संस्क्रियन्ते । ‘राम:’ इत्यस्य संस्कारस्य समये पदान्तरस्य असद्भावात् विसर्ग: प्राप्त: एव । वाक्ये विसर्गयुक्तं पदमेव (राम: इति रूपेण युक्तम्) स्थाप्यते । अत: अत्र अग्रिमं पदं किम् अस्ति इति न अवलोक्यते । वैयाकरणमूर्धन्येन नागेशेन एव इयं व्यवस्था स्पष्टीकृता परिभाषेन्दुशेखरे ’अकृतव्यूहपरिभाषा’-व्याख्यानस्य अन्ते ।

वाक्ये अपि सन्धि: करणीय: एव इति यदि उच्यते तर्हि ‘वाक्ये सा विवक्षाम् अपेक्षते’ इत्यस्य नियमस्य उच्छेद: एव स्यात् । समासादिषु यथा तथैव अत्रापि इत्येव सिद्धत्वात् विवक्षाधीनताकथनं निरर्थकं भवेत् । अत: ’संहितैकपदे...’ इत्यस्य परमप्रामाण्यम् अङ्गीकुर्वता अपि वाक्ये सन्धिविरहितप्रयोग: अपि अभ्युपगन्तव्य: एव । लौकिकानि वाक्यानि शास्त्रदृष्ट्या न प्रयुज्यन्ते इत्यत:, वक्तु: श्रोतु: च आनुकूल्यदृष्ट्या प्रयुज्यन्ते इत्यत: च सामान्यव्यवहारे सन्धिविरहितस्य प्रयोगस्य एव परमौचित्यम् ।

तथा च संहिताविवक्षायाः वाक्ये वाक्यसंस्कारपक्षविषयकत्वेन, पदसंस्कारपक्षे तस्याः विवक्षायाः परित्यागः एव । अत: सामान्यवाक्यप्रयोगावसरे पदसंस्कारपक्षस्य आश्रयणम् इति कथनात् सन्धिविरहितवाक्य-प्रयोगशैल्या: न क्वापि शास्त्रविरोधिता अपि ।

इदानीं पुन: प्रश्न: उदियात् - ‘लोके व्यवहारकाले वाक्यसंस्कारपक्ष: आश्रयणीय:, उत पदसंस्कारपक्ष: ?’ इति । वस्तुत: अत्र उत्तरं तु ‘उभयथा अपि’ इति । (पूर्वपक्षिपक्षे अस्मत्पक्षे चापि) यत्र अप्रयत्नेन सन्धि:, तत्र सन्धियुक्तमेव रूपं भवतु इति उक्तं ननु । अत: ‘तथापि’ ‘नैव’ ‘कोऽपि’ इत्यादिषु सन्धे: आश्रयणात् सिद्धं यत् वाक्यसंस्कारपक्ष: आश्रित: इति । ‘करोमि इति स: अवदत्’ इत्यादिषु संहिताया: अविवक्षिततत्वात् पदसंस्कारपक्ष: आश्रित: इति सिद्धम् ।

क्वचित् पदसंस्कारपक्ष:, क्वचित् वाक्यसंस्कारपक्ष: च आश्रीयते लोके । इयं परम्परा प्राचीनग्रन्थेषु (व्याख्यानादिषु) अपि बहुत्र आश्रिता दृश्यते । द्वित्राणि उदाहरणानि यथा -

- सिद्धान्तकौमुद्या: बालमनोरमाव्याख्याने - "इको यणचीत्यत्र अचि इक: यण् स्यादित्यवगतम् । तत्र अचो वर्णान्तराधिकरणत्वं न सम्भवतीति सति सप्तम्याश्रयणीया । अचि सति इको यण् स्यादिति । तत्र व्यवहिते अव्यवहिते इको यण् प्राप्त: । ततश्च समिधमित्यत्र धकारस्य व्यवहिते अकारे सत्यपि मकारादिकारस्य यण् स्यात् । तथा अचि सति पूर्वस्य परस्य वा इको यण् प्राप्त:..... ।

('तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्यत्र)

- सिद्धान्तकौमुद्या: तत्त्वबोधिनीव्याख्याने - "सुङस्योरिति । सोरुकार: 'अवर्णस्त्रसौ--' इत्यत्र विशेषणार्थ: । 'असि' इत्युक्ते हि अकारादावित्यर्थ: स्यात् । तथा च 'वाजमर्वत्सु' इति न सिध्येत् ।

('स्वौजसमौट्.....' इति सूत्रे)

- माधवीयधातुवृत्तौ - 'तितुत्र' इति इण्निषेध: । हस्तोऽस्यास्तीति हस्ती - 'हस्ताज्जातौ' इति इनिप्रत्यय: ।

('हसे हसने' इति धातो: विवरणे)

- रघुवंशव्याख्याने मल्लिनाथ: यथा - अत्र 'त्यागाय' इत्यादिषु 'चतुर्थी तदर्थ-' इत्यादिना..... । 'दारेष्वपि गृहा:' इत्यमर: । 'जाया च गृहिणी गृहम्' इति हलायुध: । 'मेधृ संगमे' इति धातोर्णिनि: ।

(त्यागाय सम्भृतार्थानाम् - (रघु.१.७)

दिङ्मात्रम् इह दर्शितम् । यत्र कोषसूत्रादिकम् उल्लिख्य 'इति' पदं प्रयुज्य विवरणं प्रदत्तं तत्र सन्धे: अकरणं शास्त्रग्रन्थेषु सर्वत्र दृश्यते एव । एतादृशेषु वाक्येषु किम् असाधुत्वं वक्तुं शक्येत ? न खलु ? शिष्यबुद्धिविशदतायै, स्पष्टतायै, मुद्रणानुकूल्याय वा एवं कृतं तै: इति किमपि समाधानं वक्तव्यम् ।

तस्यां शैल्याम् असाधुता न आरोप्यते, न वा असाधुता आरोपयितुं शक्या अस्माभि: । पदसंस्कारपक्ष-वाक्यसंस्कारपक्षयो: व्यामिश्रणं बहुधा दृश्यते व्याख्यानादिग्रन्थेषु इत्येतत् निरूपयितुम् एतानि वाक्यानि उपस्थापितानि । 'उभयमिश्रिता शैली प्राचीनै: आश्रिता । अत: वयमपि उभयमिश्रितां तामेव शैलीम् आश्रयाम:' इति तु न वक्तव्यम् । व्याख्यानकारादीनां दृष्टि: अन्या आसीत् । विषयस्पष्टतार्थम् उद्यता: ते यावत् आवश्यकं तावता प्रमाणेन सन्धिविरहितान् प्रयोगान् कृतवन्त: । अतः अस्माभिः अपि आवश्यकतानुसारं प्रयोगः कर्तव्यः । अद्यतनी आवश्यकता तु इयम् । सामान्येषु जनेषु संस्कृतप्रीति: जनयितव्या अस्ति अस्माभि: । यदि एषा व्यवहाररीति: न अङ्गीक्रियेत तर्हि संस्कृतस्य ह्रासं निरोद्धुं, संस्कृतं संरक्षितुं च न शक्नुयाम एव । अत: एव शास्त्रस्य विरोध: यथा न स्यात् तथा सरल: मार्ग: आश्रयणीय: एव । शास्त्रविरुद्ध: व्यवहार: न उचित: । किन्तु शास्त्रकारै: एव दर्शिता: सरला: मार्गा: अवश्यमेव अनुसरणीया: ।

**२.३.४.८. प्राचीनसाहित्यस्य न हानि:**

एतस्मिन् प्रसङ्गे अन्य: अपि प्रश्न: उदियात् - यदि सर्वत्र अपि सन्धिविरहितस्य एव प्रकारस्य प्रचार: स्यात् तर्हि प्राचीनसाहित्यस्य (सन्धियुक्तसाहित्यस्य) द्रष्टार: एव न भवेयु:, सन्धियुक्तशैल्या: प्रयोक्तार: एव न स्यु:, सन्धिरहितया एव शैल्या साहित्यसृष्टि: भवेत्, प्राचीनसाहित्यस्य अवसानमेव भवेत् कालान्तरे इति । भीति: एषा सर्वथा अस्थाने । सन्धिरहितशैल्या: आश्रयणं सन्धिसहितशैल्या: निराकरणाय न भवति । नूतनानाम् आनुकूल्याय एषा सन्धिरहिता शैली आश्रीयते प्राथमिकस्तरे । अत: एव इत:पूर्वं स्तरत्रयस्य प्रतिपादनं कृतम् ।

सन्धिरहितशैल्या ये भाषाभ्यासं कृतवन्त: ते तावता एव विरमन्ति इति न मन्तव्यम् । सन्धिसहिताया: शैल्या: अपि पठनं ते करिष्यन्ति एव भाविनि काले । अत: सन्धिसहिता शैली उच्छिन्ना भवेत् इति भीति: अस्थाने । अन्यच्च उभयो: अपि शैल्यो: परस्परपूरकता एव, न तु परस्परविरोध: ।

प्राथमिकस्तरे सरलस्तरस्य परिचय: भवतु इत्यस्य प्रतिपादनस्य उद्देशस्तु - नूतना: बहव: संस्कृताध्ययनं कुर्वन्तु, संस्कृतस्य प्रचार: अधिकाधिकतया भवतु च इति । एवं भाषापरिचयं प्राप्तवन्त: अग्रे क्व गच्छेयु: ? ते काव्यादीनां शास्त्राणां च अध्ययने प्रवृत्तिं दर्शयेयु: । अग्रिमाणि सोपानानि आरोढुम् एव भवन्ति प्राथमिकसोपानानि । तत्र सरलता कल्पनीया इत्येव एव सरलमानकसंस्कृतस्य लक्ष्यम् ।

प्राथमिकस्तरे सरलताश्रयणात् अन्यविधा: शैल्य: उच्छिन्ना: न भवेयु: इत्येतत् वयम् अन्यभाषाक्षेत्रेषु पश्याम: अवश्यमेव । सामान्यान् उद्दिश्य य: व्यवहार: प्रचलति तत्र सरलता एव भवति । तावता अन्यविधा शैली उच्छिन्ना न भवति, प्रत्युत सामान्या: जनाः गच्छता कालेन तामपि शैलीम् अवगन्तुं शक्नुवन्ति एव ।

सरलमानकसंस्कृतं नाम किम् इत्येतावत: अवगमनमात्रेण, सा अनुसरणीया इति इच्छामात्रेण वा तत्सम्बद्धं कौशलम् आत्मसात् न भवति । तद्विषये निरन्तरं प्रयास: करणीय: । तदा एव सा शैली अनुसृता स्यात् ।

एषा शैली विद्वद्भि: अपि किम् अनुसरणीया ? 'आम्' इत्येव उत्तरम् । काव्यादिलेखनसमये अभिलषित-शैल्या: अनुसरणे वयं स्वतन्त्रा: । किन्तु सामान्या: अवगच्छेयु: इति उद्देशेन यत् लिख्यते, यत् भाषणं क्रियते, तत्र एतस्य सरलमानकसंस्कृततत्त्वस्य अनुसरणम् अवश्यं करणीयम् । नूतनानां बोधनावसरे अपि सा एव शैली आश्रयणीया । पत्रिका: एतामेव शैलीम् अनुसरेयु: । आकाशवाणीदूरदर्शनादय: एतया एव शैल्या वार्ताप्रसारं कुर्यु: । पाठ्यक्रमेषु अपि एतस्या: शैल्या: अनुसरणं प्रचलेत् ।

सरलमानकसंस्कृतस्य अपरमपि प्रयोजनं नाम - भाषाशुद्धौ विकास: । विद्वद्भि: अनुस्रियमाणां शैलीम् अनुकुर्वन्त: बहव: स्पष्टज्ञानाभावात् बहुधा दोषान् कुर्वन्ति । सरलनियमाश्रयणात् ते दोषा: न भवेयु: । विस्तृतभाषापरिधौ कार्यं कुर्वतां ज्ञानपरिधि: अपि विस्तृत: एव भवेत् । ज्ञानपरिधि: येषाम् अल्प: ते विस्तृत-भाषापरिधौ कार्यं कुर्वन्ति इत्यत: भाषादोषा: अधिका: भवन्ति । सामान्यपरिधौ कार्यकरणात् दोषा: न्यूना: भवेयु: अवश्यमेव ।

## २.४. संज्ञापदेषु विभक्तियोजनम्

संस्कृतेन व्यवहार: यत्र प्रचलति तत्र अनेकविधानां शब्दानां प्रयोग: भवति । तत्रापि संज्ञापदानां प्रयोगे भवति महती समस्या । व्यक्तिनामानि, ग्रामनगरादिनामानि, वस्तुनामानि, ..... इत्येवं भवन्ति बहुविधानि संज्ञापदानि । एतानि व्यवहारे बहुधा उपयोक्तव्यानि एव भवन्ति । एतादृशानि पदानि अन्यासु अपि भाषासु उपयुज्यन्ते एव । तत्र विशेषसमस्या न अनुभूयते । किन्तु संस्कृतभाषायां तु शास्त्रानुग्रह: चिन्तनीय: एव इत्यत: विषयेऽस्मिन् विवेक्तव्यम् अस्ति किञ्चित् ।

संस्कृतव्याकरणनियमानाम् अन्यभाषानियमानां च मध्ये अस्ति महान् भेद: । अन्यासु भाषासु विभक्तियोजनादिकं न क्लेशाय । संस्कृतभाषायां तु नियम: अस्ति - 'अपदं न प्रयुञ्जीत' इति । पदसंज्ञाविहीन: प्रयोग: न अनुमन्यते संस्कृतक्षेत्रे । एतां पदसंज्ञां पुरस्कृय एव विभक्तिप्रत्ययादय: समासादिशास्त्राणि च प्रवर्तन्ते । विभक्तिप्रत्ययेषु परेषु अनेकविधानि सन्धिकार्याणि प्रवर्तन्ते, अनेकानि सूत्राणि बहुधा विकारं जनयन्ति च । लिङ्गभेदात् रूपभेदा: सम्भवन्ति अपि । लेनिन्, क्लिण्टन् इत्यादौ नकारलोप: प्रसज्येत । अय्यर्, हिट्लर् इत्यादिषु रेफस्य विसर्ग: भवेत् । साक्रेटीस्, फर्नाण्डीस् इत्यादौ रुत्वं, तत: विसर्ग: च स्यात् । क्रुश्चेव् इत्यादिषु ऊठ: प्रसक्ति: स्यात् । ऐर्लेण्ड्, इङ्गलेण्ड् इत्यादिषु संयोगान्तलोप: करणीय: भवेत् । आदेशलोपादय: क्रियेरन् चेत् संज्ञास्वरूपभङ्ग: स्यात् । क: अंश: (जन: नगरादिकं वा) निर्दिश्यमान: अस्ति इत्यस्य अवगमनं न भवेत् । विकृतरूपश्रवणात् श्रोतॄणां महान् उद्वेग: स्यात् । एतादृश: व्यवहार: उपहासास्पदतां गच्छेत् । ये पूर्वोक्तान् नलोप-संयोगान्तलोप-रुत्व-विसर्गादिसम्बद्धान् नियमान् न जानीयु: (प्रक्रियां न जानीयु:) ते नगरादिवाचकपदानां प्रयोगे महान्तं क्लेशम् अनुभवेयु: ।

### २.४.१. अव्युत्पन्नानां संज्ञाशब्दानां विभक्तियोजनम्

विभक्तिप्रत्ययेषु कृतेषु विकारा: ये सम्भवन्ति तेषां निवारणाय क: उपाय: इति चिन्तनात् पूर्वम् अन्य: अपि अंश: अवधातव्य: अस्ति अत्र । क्लिण्टन्, डेविड्, रामप्प:, कुलकर्णि: इत्यादय: अव्युत्पन्ना: शब्दा: । अव्युत्पन्नत्वात् एव प्रातिपदिकत्वाभाव: । प्रकृतिप्रत्ययविवेकयुक्ता: एव प्रातिपदिकसंज्ञां लभन्ते । अव्युत्पन्नानां तु प्रातिपदिकत्वाभावात् विभक्तियोजनमपि न सम्भवति । तथा सति संस्कृतेन व्यवहार: असाध्य: एव स्यात् । तदा तु संस्कृतस्य व्यवहारभाषात्वयोग्यता एव अपगच्छेत् ।

वस्तुतस्तु, 'अर्थवदधातुरप्रत्यय: प्रातिपदिकम्' इति सूत्रे 'अर्थवत्' इति शब्देन संज्ञाशब्दा: एव गृह्यन्ते इति वैयाकरणानां सिद्धान्त: । यत: व्युत्पन्ना: अन्ये सर्वे शब्दा: 'कृत्तद्धितसमसाश्च' इति सूत्रेण गृह्यन्ते । तेन सूत्रेण अगृहीता: तु संज्ञाशब्दा: एव । अत: एव हरदत्त: (काशिकाया: 'पदमञ्जरी'नामिकाया: व्याख्याया: रचयिता) वदति

- ”अर्थवत्सूत्रस्य डित्थादीनि अव्युत्पन्नान्येव उदाहरणानि, व्युत्पत्तौ कृदन्तत्वादेव सिद्धम्” इति । विषयेऽस्मिन् वैयाकरणकुले महती चर्चा प्रवृत्ता दृश्यते । विस्तरभयात् तत्सर्वं न उल्लिख्यते अत्र । अयमत्र सार: -

“अपशब्दा: न प्रयोक्तव्या: । गौ: इत्यर्थे गावी गोणी गोपोतलिका इत्यादय: असाधव: अपशब्दा: । अत: ‘गौ:’ इत्यर्थे गोणीशब्द: न प्रयोक्तव्य: । अन्यार्थे तु गोणीशब्द: साधु: एव । एकप्रवृत्तिनिमित्तत्वे सति अनुशिष्ट: शिष्टप्रयुक्त: वा प्रकृतिशब्द: असाधुशब्दं निवर्तयति । ’गो’शब्द: ‘गावी’शब्दं निवर्तयति । अत: ‘गावी’शब्द: गौ: इत्यर्थे न अपशब्द: । संज्ञाशब्दानां तु पर्यायशब्दा: कस्याञ्चिदपि भाषायां न भवन्ति इत्यत: तेषां निवर्त्यत्वं न सम्भवति । यत्र व्याकरणसंस्कृतस्य शब्दान्तरस्य सम्भव:, तत्र अन्यभाषाशब्दा: न प्रयोक्तव्या: । ते अपशब्दत्वेन परिगण्यन्ते । संज्ञास्थले तु तदर्थबोधकस्य शब्दान्तरस्य अभावात् संज्ञाशब्दानां न असाधुता । अत: तेषां प्रयोगार्हता अस्ति” इति ।

एतां नीतिम् आश्रित्य एव प्राचीनै: अपि व्यवहार: निर्वर्तित: । ‘यर्वाणस्तर्वाणो नाम ऋषयो बभूवु:’ इति भाष्यप्रयोग: । रुत्वम् उत्वम् इत्यादीनां प्रवर्तनात् सिद्ध्यति यत् यादृच्छिकसंज्ञाशब्देभ्य: सुबुत्पत्ति: भवितुम् अर्हति एव इति । ये डित्थडवित्थादय: शब्दा: श्रूयन्ते शास्त्रेषु बहुधा, तेषामपि साधुता ‘संज्ञात्वात् न असाधुता’ इति तत्त्वस्य आश्रयणात् एव । अप्पय्यदीक्षित:, कौण्डभट्ट:, भट्टोजिदीक्षित:, नागोजि:, मम्मट:, कैयट:, जय्यट:, रुय्यक:, भट्टि:, सायण:, मायण:, कल्हण:, जल्हण:, मेण्ठ:, हूण:, पारसीक: इत्यादय: अनन्ता: शब्दा: ये प्राचीनै: प्रयुक्ता: तत्र सर्वत्र पूर्वोक्ता एव नीति: अन्वेति । होय्सळ-बल्लाळ-गङ्ग-चालुक्यादीनि अपि एतादृशानि एव ।

ज्योतिषग्रन्थेषु इत्थसाल:, इक्कवाल:, ईसराफ:, मुसरीफ:, दुरुफ:, खल्लासर:, तुरुष्क: इत्यादय: शब्दा: ये प्रयुक्ता: दृश्यन्ते तत्र अपि पूर्वोक्ता एव नीति: अन्वेति ।

### २.४.२. संज्ञाशब्दानां प्रयोगप्रकार:

प्रकृतिप्रत्ययादिविवेकराहित्ये सत्यपि अव्युत्पन्नप्रातिपदिकत्वम् अभ्युपगत्य संज्ञाशब्दानां विभक्तियोजनं सम्भवति इति सिद्धम् । इत: परं तादृशानां संज्ञाशब्दानां प्रयोगप्रकारं चिन्तयाम -

- गुण्डप्प, रामण्ण, भैरेगौड, सोनु, मानु इत्यादीनां तत्तदन्तता अभ्युपगन्तव्या । गुण्डप्प: अकारान्त:, सोनु: उकारान्त: इत्येवम् ।
- लिङ्कन्, ब्राड्मन्, डेविड्, जोन्स्, विलियम्, मार्कट्विन्, क्रुश्चेव् इत्यादीनाम् अकारान्तता सम्पादनीया स्वरयोजनेन । अत: लिङ्कन:, डेविड:, जोन्स:, क्रुश्चेव: इत्यादीनि रूपाणि सम्भवन्ति ।
- स्वामिनाथन्, राधाकृष्णन्, सुब्रह्मण्यम्, वेङ्कटाचलम् इत्यादय: नान्ता: मान्ता: वा श्रूयन्ते । अत्रापि अकारान्तता अङ्गीकरणीया । अन्तिमस्य व्यञ्जनवर्गस्य त्याग: चिन्तनीय: । यथा - स्वामिनाथ:, सुब्रह्मण्य:

इत्यादय: । यतः एते तत्समाः, तद्भावाश्च । अतः प्रकृतिभूतः संस्कृतशब्दः अकारान्तः सरलः च चेत् सः एव भवति ।

- रङ्गराजन्, राजन्, राज इत्यादय: अपि अकारान्ता: स्यु: । नृपपर्याय: 'राजन्' इति नान्त: शब्द: तु अस्ति । स: अत्र न अभिप्रेत: । अत: अत्युत्पन्न: 'राज'शब्द: अत्र इति मन्तव्यम् ।
- पराञ्जपे, अन्तुले, देशपाण्डे इत्यादीनि कुलनामानि क्वचित् व्यक्तिनिर्देशाय अपि उपयुज्यन्ते । (व्यक्तिनाम किञ्चन भवति । तथापि कुलनामसहितव्यक्ते: निर्देशे पददैर्घ्यं भवति इत्यत: कुलनाममात्रं प्रयुज्यते तत्र) एजन्तादय: शब्दा: सन्ति संस्कृते । किन्तु व्याकरणानुरोधेन सम्पद्यमानं रूपं प्रयोगसुलभं न, कर्णवेधकं च । तादृशप्रयोगात् संज्ञास्वरूपस्यापि भङ्गापत्ति: । अत: एजन्तादित्वाद्यङ्गीकारे न औचित्यम् । 'तादृशेषु प्रसङ्गेषु स्वार्थिक: 'क'प्रत्यय:, बन्धुशब्द:, गोत्रशब्द:, नामनामकौ वा प्रयोक्तुं शक्यन्ते' इति वैयाकरणमूर्धन्य: रङ्गनाथशर्मा । अत: पराञ्जपेक:, पराञ्जपेबन्धु:, पराञ्जपेनामा, पराञ्जपेनामक: इत्येवं भवितुम् अर्हति । 'अस्मिन् विषये प्रयोक्तॄणां कामचार: अस्तु । यस्मै यत् रोचते तत् अन्यस्मै न रोचते । कालेन काचित् व्यवस्था भविष्यति' इति वदति रङ्गनाथशर्मवर्य: । 'पराञ्जपे इत्यस्य पराञ्जप: इति, पराञ्जपिरिति वा कथनं न विरुद्धम्' इति नु.ति. श्रीनिवासैय्यङ्गार्य: ।
- यत्र व्यक्तिनामकुलनाम्नो: उभयो: सतो: अपि केचन कुलनाम्ना एव प्रसिद्धा: भवन्ति । तादृशे प्रसङ्गे एकत्र 'अरविन्ददेशपाण्डे' इत्येवम् उल्लिख्य अग्रे सर्वत्रापि अरविन्द: इति, गौरवसूचनायां विवक्षितायाम् अरविन्दवर्य: इति वा प्रयोग: भवितुम् अर्हति ।
- 'ओबामा'प्रभृतय: आकारान्तत्वेन अकारान्तत्वेन वा प्रयोक्तुं शक्या: । आकारान्तत्वे रूपाणि कठिनानि (विश्वपावत् रूपाणि) । अकारान्तत्वे सरलता । ('ओबाम:' इति रूपम्)
- मोदी गान्धी इत्यादीनि यानि कुलनामानि, तानि अपि उपयुज्यन्ते व्यक्तिनिर्देशाय । केचन नान्तत्वेन तेषाम् उपयोगं कुर्वन्ति । नान्तत्वे अपि प्रकृतिप्रत्ययादिसंस्कारवत्त्वाभावात् मतुबर्थादिप्रतीति: तु तत: न भवति । अत: इकारान्तत्वेन (मोदि: गान्धि: इत्येवम्) प्रयोग: अपि सुकर: एव ।
- पञ्जाबराज्ये महिलापुरुषयो: नाम समानं भवति बहुधा । 'कौर'योगे महिलात्वप्रतीति:, 'सिङ्ग'योगे पुंस्त्वस्य भानम् । तादृशे प्रसङ्गे पुंवाचक: अकारान्तत्वेन, स्त्रीवाचक: आकारान्तवेन च प्रयोक्तुं शक्य: । यथा - मनप्रीतसिङ्ग - मनप्रीत:, मनप्रीतकौर - मनप्रीता ।
- एलिजाबेत्, एञ्जलिक्, वीनस्, गुलाब्, नूरजहान् इत्यादीनि, एतादृशानि महिलानामानि च आकारान्तवेन परिगणनीयानि ।
- इकारान्ता: स्त्रीवचका: संज्ञाशब्दा: मतिशब्दवत्, पुंवाचका: हरिशब्दवत् च रूपं प्राप्नुवन्तु । उकारान्तादय: अपि एवमेव । एतदत्र स्मर्तव्यं यत् इकारान्तादीनां पुंवाचकानां स्त्रीवाचकानां च रूपे समानता भवति द्वितीयाबहुवचनपर्यन्तम् । ततोऽग्रे रूपभेद: भवति ।

यथा - (पुं) मन्दा मति: यस्य स: मन्दमति: । तस्य रूपाणि - मन्दमति: मन्दमती मन्दमतय: ।
मन्दमतिं मन्दमती मन्दमतीन् । मन्दमतिना...

(स्त्री) मन्दा मति: यस्या: सा मन्दमति: । मन्दमति: मन्दमती मन्दमतय: । मन्दमतिं मन्दमती मन्दमती: । मन्दमत्या...

- सविता, सुचेता इत्यादीनि महिलानामानि भवन्ति । तत्र अव्युत्पन्नप्रातिपदिकत्वम् उक्त्वा आकारान्तता अभ्युपगन्तव्या । सूर्यवाचक: कश्चन ऋकारान्त: सवितृशब्द: अस्ति । स: पुंवाचक: । तस्य प्रथमैकवचनान्तं रूपं 'सविता' इत्येव । स च अर्थ: न अभिप्रेत: अत्र । अत: 'सविता' इत्यस्य स्त्रीवाचकस्य संज्ञाशब्दस्य अव्युत्पन्नत्वं वक्तव्यम् । व्युत्पन्नत्वे तु सूर्यवाचकत्वं पुंस्त्वम् इत्यादिकं बाधकत्वेन आपद्येत । एवमेव 'सुचेता' इत्यादिषु अपि । व्युत्पन्नत्वे सकारान्तता स्यात् । स्त्रीत्वमपि सूपपादम् । किन्तु प्रयोगे क्लेश: अभ्युपगन्तव्य: ।
- सरस्वती रमेश:, गीता रामचन्द्र:, उमा देशपाण्डे इत्यादीनि स्त्रीनामानि अद्यत्वे सर्वत्र श्रूयन्ते । तन्नाम पतिनामसहिततया कुलनामसहिततया वा निर्देशः दृश्यते लोके । तादृशे प्रसङ्गे एकत्र पतिनामसहितस्य कुलनामसहितस्य वा स्त्रीनाम्न: उल्लेखं कृत्वा अन्यत्र सर्वत्र व्यक्तिनाममात्रस्य प्रयोग: यदि क्रियेत, तर्हि विभक्तियोजनादिषु क्लेश: अपगच्छेत् । तन्नाम एकत्र 'सरस्वती रमेश उपस्थिता आसीत्' इति निर्दिश्य, अन्यत्र सर्वत्र 'सरस्वत्या उक्तम्' 'सरस्वतीवर्यया सूचितम्' इत्यादिक्रमेण निर्देशः भवितुम् अर्हति ।
- हैदराबाद, अलहाबाद, लण्डन्, फ्रान्स् इत्यादीनि ग्राम-नगर-देशनामानि यानि लोके श्रूयन्ते तत्र अकारान्तता पुंस्त्वं (क्वचित् नपुंसकत्वं वा) च अभ्युपगन्तव्यम् । दिल्ली, मुम्बयी इत्यादिषु ईकारान्तता एव भवितुम् अर्हति । स्यान्फ्रान्सिस्को, मास्को इत्यादीनि ओकारान्तानि यत्र भवन्ति तत्र नगरपदान्तता (मास्कोनगरम् इत्येवम्) अकारान्तता वा (मास्क: इति वा) प्रयोक्तुं शक्या । बेङ्गलूरु, मैसूरु, मत्तूरु, तुमकूरु इत्यादय: उकारान्ता: भवितुम् अर्हन्ति । अकारान्तता वा स्यात् । एवमेव इतरत्र अपि ।

यत्र पददीर्घता न स्यात् तादृशेषु 'नगर'पदयोजनमपि भवितुम् अर्हति । यथा - मैसूरुनगरे, तिरुपतिनगरे...

- केचन संस्कृतज्ञा: भावयन्ति यत् नगरादिनिर्देशाय व्युत्पन्नानि नामानि एव प्रयोक्तव्यानि इति । अत: ते कल्याणनगरी भाग्यनगरम्, गर्तपुरी, महीशूरपुरी, अगस्त्यपुरी इत्यादीनि पदानि प्रयुञ्जते । एतादृशानां प्रयोगाणां तात्पर्यं विरलै: एव अवगम्येत इत्यत:, संज्ञाशब्दानां विभक्तियोजने शास्त्रविरोध: नास्तीत्यत: च सर्वजनसुलभानां नाम्नां प्रयोग: एव वरम् ।

केचन अभिप्रयन्ति - महोदय-महाशय-वर्य-नामक-ग्राम-नगरादिशब्दानां संज्ञाशब्दान्ते योजनेन इष्टसिद्धि: इति । यथा - मुखर्जिमहोदय:, रावमहाशय:, देशपाण्डेवर्य:, पुत्तूरुग्राम:, हैदराबादनगरम् इत्येवम्.. । एतत् शब्दान्तर-योजनं यद्यपि न दुष्यति तथापि सर्वत्र प्रयोगार्हता भवितुं नार्हति अस्य क्रमस्य । बालकेषु, शिष्येषु, पुत्रेषु, भृत्येषु, अन्येषु प्राकृतेषु वा नामान्ते महोदयादिपदयोजनं न युज्यते । समाजघातकादीनां निर्देशावसरे महोदयादिपदयोजनम् उपहासपात्रतां गच्छेत् । अत: अयमपि क्रम: न सार्वत्रिक: भवितुम् अर्हति । यत्र

आदरादिद्योतकत्वम् इष्यते तत्र भवतु महोदयादिपदयोजनम् । अन्यत्र सर्वत्र तु पूर्वोक्तदिशा विभक्तियोजनमेव वरम् ।

### २.४.३. 'प्रोफेसरस्य' इत्यदय: असाधव:

विषयेऽस्मिन् अन्य: कश्चन प्रश्न: उद्भवेत् - प्रोफेसरस्य, कालेजस्य, प्रिन्सिपालस्य, गवर्नरस्य, टेबल्लस्य, इत्यादय: प्रयोगा: किं साधव: इति । वस्तुत: ते असाधव: एव । यादृच्छिकानां संज्ञाशब्दानाम् एव विभक्तियोजनम् अभ्युपगतं शास्त्रकारै: । 'प्रोफेसर्' इत्यादय: न हि संज्ञाशब्दा: । तद्वाचका: प्राध्यापकादय: शब्दा: सन्ति एव । अत: प्राध्यापकादय: प्रकृतिप्रत्यययुक्ता: व्युत्पन्ना: एव शब्दा: साधव: । तदर्थे प्रयुज्यमाना: 'प्रोफेसर्'प्रभृतय: असाधव: भवन्ति ।

वस्तूनाम् आधुनिकत्वात् तेषां निर्देशाय संस्कृतभाषायां शब्दा: न भवेयु: कदाचित् । तादृशे अवसरे अन्यभाषागतं प्रवृत्तिनिमित्तं दृष्ट्वा नूतना: शब्दा: स्रष्टव्या:, न तु यथास्थितमेव प्रयोक्तव्या: । संज्ञात्वे तु तदर्थबोधकशब्दसर्जनस्य अशक्यत्वात् यथास्थितमेव प्रयोक्तव्या: । असंस्कृतस्य लेनिनादिपदस्य विभक्तयोजनम् अभ्युपगतं चेत् 'प्रोफेसर्'प्रभृतीनामपि विभक्तियोजनं भवतु इति न चिन्तनीयम् । संस्कृतत्वम् असंस्कृतत्वं वा विभक्तियोजनस्य त्यागस्य वा न कारणम् । प्रत्युत संज्ञात्वम् असंज्ञात्वं च तत्र कारणम् । संज्ञात्वे सत्येव विभक्तियोजनं करणीयं, न तु अन्यथा । अत: प्रोफेसरस्य, टेबल्लस्य इत्यादय: प्रयोगा: दुष्यन्ति एव ।

उत्साहवशात् संस्कृतक्षेत्रे विशेषपाण्डित्यरहिताः अपि केचन यथामति आधुनिकवस्तुनिर्देशाय पदानि निर्मान्ति । एतादृशानि सर्वाणि अपि पदानि साधूनि न भवन्ति कदाचित् । अतः एतेषां स्वीकारे प्रयोगे वा जागरूकता वोढव्या । कस्मिंश्चित् पुस्तके अस्ति इत्येतावन्मात्रेण तानि पदानि न स्वीकर्तव्यानि । प्रकृतिप्रत्ययादि-विवेकः चिन्तनीयः । तादृशं सामर्थ्यं येषां न स्यात् ते विदुषां मार्गदर्शनं प्राप्नुयुः तस्मिन् विषये ।

### २.४.४. आदरार्थे बहुवचनप्रयोग:

प्रसङ्गवशात् आदरार्थे बहुवचनं यत् प्रयुज्यते तद्विषये किञ्चित् उच्यते । एकत्वद्योतनाय एकवचनं, द्वित्वद्योतनाय द्विवचनं, त्रित्वादिद्योतनाय बहुवचनं च प्रयुज्यते । किन्तु प्रादेशिकभाषासु आदरार्थे अपि बहुवचनप्रयोग: क्रियते सर्वत्र । तं क्रमम् अनुकुर्वद्भि: संस्कृतज्ञै: अपि बहुभि: सभादिषु आदरद्योतनाय बहुवचनप्रयोग: क्रियते । वस्तुतस्तु अत्र औचित्यं नास्ति । आदरद्योतनाय महाशय-महोदय-वर्यादय: शब्दा: प्रयोक्तुं शक्या: । तद्युक्ता: शब्दा: स्यु: एकवचने । यथा - मुख्यमन्त्रिवर्य:, गोखलेमहाशय: इत्येवं प्रयोग: स्यात् । एतादृशेषु स्थलेषु 'मान्या: मुख्यमन्त्रिवर्या:....' इत्येवं वक्तव्यं नास्ति । वर्यादिपदयोजनपुरस्सरम् एकवचनेन एव इष्टसिद्धि: । एषा एव संस्कृतशैली ।

'गुरावात्मनि बहुवचनम्' इति वचनं तु प्रसिद्धम् । गुरो: निर्देशावसरे, आत्मन: निर्देशावसरे च क्वचित् बहुवचनप्रयोग: संस्कृतक्षेत्रे अपि दृश्यते । गुरौ बहुवचनप्रयोग: तु - 'एवमाहुरस्मदाचार्या:' इत्येवमादिरूपेण । क्वचित् आत्मनि बहुमानेन अपि बहुवचनप्रयोग: क्रियते । तथा हि -

व्याख्येयार्थबहुत्वेन बहुमानेन चात्मन: ।

व्याख्यात्रात्मन्यथारोप्य बहुत्वं तु प्रयुज्यते ॥

यथा हि निधिमासाद्य प्रयुञ्जानस्तु दृश्यते ।

एते वयं समृद्ध्यर्था देवोऽस्मासु प्रसीदति ॥

- (वेदार्थदीपिकायां षड्गुरुशिष्य:)

एवं क्वचिदेव एकत्वे द्योत्यमाने अपि बहुवचनप्रयोग: । अन्यत्र सर्वत्र तु एकवचनप्रयोग: एव । अत: संस्कृतमर्यादाम् अवलम्बमानै: अस्माभि: आदरार्थेऽपि एकवचनप्रयोग: एव करणीय:, न तु बहुवचनप्रयोग: ।

**तृतीयः अध्यायः**

# ३. सरलमानकसंस्कृतस्य क्रियान्वयनम्

## ३.१. क्रियान्वयनाय क्षेत्राणि

सरलमानकसंस्कृतस्य आवश्यकता स्वरूपं च सङ्ग्रहेण दृष्टम् । एतस्य अन्वयपक्षविषये अपि अवधातव्यम् अस्माभि: । अधोनिर्दिष्टेषु क्षेत्रेषु एतस्य प्रयोग:/अन्वय: भवितुम् अर्हति ।

### ३.१.१. भाषितॄणां जनानां मध्ये

सर्वासामपि भाषाणां भाषितार: (प्रयोक्तार:) भवन्ति विविधस्तरीया: । सुशिक्षिता: इव अशिक्षिता: अपि भवन्ति, पण्डिता: इव पामरा: अपि भवन्ति, सुज्ञा: इव अल्पज्ञा: अपि भवन्ति, महानगरवासिन: इव कुग्रामवासिन: अपि भवन्ति । अत: अयं 'भाषितृ'प्रपञ्च: सुविस्तृत: । सर्वेषामपि प्रयोगानुकूल्यं तु सरलमानकसंस्कृतत: एव भवेत् । ये सरलतामेव इच्छेयु: ते अपि स्वमत्यनुगुणं व्यवहरेयु: यत् तत् अपि कदाचित् काठिन्याय भवेत् । सरलमानकसंस्कृतं एतां समस्यां परिहर्तुम् अर्हति ।

### ३.१.२. शिक्षण-प्रशासन-मनोरञ्जन-सम्पर्क-विज्ञान-वाणिज्य-सूचनादीनां माध्यमरूपेण

शिक्षणादीनि क्षेत्राणि सन्ति बहूनि । अत्र सर्वत्रापि संस्कृतेन व्यवहार: तदा एव सम्भवेत्, यदा च तत्र सर्वत्र च सरलमानकसंस्कृतस्य उपयोग: स्यात् । अन्याधुनिकभारतीयभाषायाः इव संस्कृतभाषायाः अपि सम्पर्क-भाषारूपेण व्यवहारः स्यात् । सर्वप्रथमम् एतादृशाः प्रयोगाः विविधकार्यालयेषु प्रारब्धाः भवेयुः, तदनन्तरं क्रमशः विविधेषु सार्वजनिकस्थलेषु विविधसमारोहाद्यवसरेषु च सम्प्रसारिताः भवितुम् अर्हन्ति । तत्रापि आदौ संस्कृतपाठशालासु, महाविद्यालय-विश्वविद्यालयानां संस्कृतविभागेषु, संस्कृतविश्वविद्यालयानां सर्वेषु कार्यालयेषु च सरलं संस्कृतं व्यवहारभाषारूपेण प्रयोक्तव्यम् ।

कार्यालयेषु व्यवहारदृष्ट्या कतिपये निम्नोक्ताः पक्षाः अवधेयाः -

- संस्कृतेन विभागानां नामोल्लेखः - तद्यथा - 'विभागाध्यक्षः', 'वित्तविभागः', 'व्याख्यानप्रकोष्ठः' इत्यादयः । तत्र देवनागरीलिपिः प्रयोक्तव्या । अथवा तत्तत्प्रान्तगताः ओडिआ-तेलुगु-कन्नडादिलिपयः वा प्रयोक्तव्याः ।
- सञ्चिकानां नामकरणम् - तद्यथा 'नामाङ्कनम्', 'पत्राचारः', 'वेतनम्' इत्यादि ।
- सञ्चिकासु टिप्पणी हस्ताङ्कनं च - सञ्चिकासु स्वाभिमतोल्लेखनं टिप्पणीलेखनं वा संस्कृतेन कथं कर्तुं शक्यते इति एतदर्थं सम्बद्धानां पदाधिकारि-लिपिकादीनां प्रशिक्षणं करणीयम् ।
- पत्राचारः - मन्त्रालयादिभिः सह आधिकारिकपत्राचारावसरे सरलसंस्कृतस्य प्रयोगद्वारा एव स्वविषयं सम्यक्तया सम्प्रेषयितुं शक्येत । तदर्थं सम्बद्धव्यक्तीनां कृते प्रशिक्षणम् अपेक्षितं भवति ।
- सम्पर्कभाषारूपेण प्रयोगार्थं परिवेशनिर्माणम् - संस्कृतस्य अध्यापकाः छात्राः शोधार्थिनः अपरे संस्कृतानुरागिणः च सम्मिल्य संस्थायाः परिसरे परस्परसम्पर्कभाषारूपेण संस्कृतस्य प्रयोगं कुर्युः । तदर्थं दैनन्दिनव्यवहारे समागच्छन्ति वाक्यानि, कतिपयाः क्रियाः, उपयोगिनः स्थानीयभाषया सह तुल्यधर्मं

साधयन्तः सरलसंस्कृतशब्दाः च प्रयोगपथम् आनेयाः । लोके प्रयुज्यमानानां “स्वागतम्”, “सुप्रभातम्”, “धन्यवादाः” इत्यादीनां सरलानां भावसम्प्रेषकाणां सम्बोधनादिवाक्यानां संग्रहं कृत्वा व्यवहर्तव्यम् ।

**३.१.३. अनुवादावसरे (इतरभाषात: संस्कृतं प्रति) -**

संस्कृतेतरभाषायां स्थितस्य उत्कृष्टस्य साहित्यस्य संस्कृतेन अनुवाद: यदि महता प्रमाणेन स्यात् तर्हि संस्कृतज्ञा: विविधभाषामयस्य साहित्यक्षेत्रस्य उत्कृष्टस्य साहित्यस्य परिचयं प्राप्नुयु: । सर्वासामपि भाषाणां बान्धव्यं सुदृढं स्यात् च । एतादृशम् अनुवादसाहित्यं सरलमानकसंस्कृतनिबद्धं यदि स्यात् तर्हि सामान्यान् जनान् अवश्यं प्राप्नुयात् । एतदर्थं च तत्तद्भाषाभ्यः संस्कृते पदकोशाः निर्मातव्याः, यैः अनुवादे जनाः काठिन्यं न अनुभवेयुः ।

**३.१.४. संस्कृतेन एव समकालिकसाहित्यस्य निर्माणावसरे**

सरलसंस्कृतनिबद्धं नवसाहित्यं महता प्रमाणेन आवश्यकम् अस्ति । यत: तादृशस्य साहित्यस्य पठितॄणां सङ्ख्या अस्ति महती । सा सङ्ख्या वर्धिष्यते च । ‘सृज्यमानस्य साहित्यस्य पठितार: के ?’ इत्येतस्या: महत्या: समस्याया: परिहार: इत: भवितुम् अर्हेत् । साहित्यपठनावसरे भाषा कदापि क्लेशकारिणी न भवेत् । विषयशैल्यादीनाम् अवगमनस्यैव प्राधान्यं स्यात् साहित्ये । [एतस्य तात्पर्यम् अयं न यत् पद्यानि महाकाव्यानि इत्यादिषु या भाषा प्रयुज्यमाना अस्ति सा स्थगनीया इति । सा परम्परा तु अनुवर्तते एव । तादृशस्य वाचका: अद्य ये स्यु: ते अग्रे अपि तादृशं पठिष्यन्ति । अत: सरलमानकसंस्कृतं तादृश्या: साहित्यकृषे: विरोधिनी न इति पूर्वं विवृतम् एव ।]

**३.१.५. शब्दनिर्माणस्य निरन्तरतावसरे -**

विज्ञानतन्त्रज्ञानप्रगते: कारणत:, आ बहो: कालात् आधुनिकविषयान् अधिकृत्य लेखनरूपा सम्भाषणरूपा वा अभिव्यक्ति: आधिक्येन न जाता इति कारणत: च नूतनानां शब्दानां सृष्टि: मन्दया गत्या प्राचलत् संस्कृतक्षेत्रे । यदि एषा प्रक्रिया वेगेन प्रवर्तेत तर्हि भाषा समृद्धा स्यात्, सर्वजनादरणीया स्यात् च । संस्कृतक्षेत्रेण सृष्टा: शब्दा: अन्यभाषाक्षेत्रीयै: अपि स्वीक्रियेरन् । यत: नूतनशब्दानाम् आवश्यकता सर्वभाषाक्षेत्रेषु अपि अस्ति एव । नूतन-शब्दनिर्माणावसरे प्रकृतिप्रत्ययविवेकः, तदर्थप्रतिपादकता, सरलता, सुलभग्राह्यता, सौन्दर्यम्, अविस्तृतता, प्रयोगानुकूल्यम् इत्यादीनि मानकानि निश्चेतव्यानि ।

**३.१.६. तन्त्रज्ञानस्य स्वीकृतिविषये** (Technology Adaptation)

विनूतनानि तन्त्रज्ञानानि प्रतिदिनं व्यवहारपथम् आयान्ति अद्यत्वे । यदि तेषाम् अन्वयाय संस्कृतक्षेत्रं सज्जं न स्यात् तर्हि निश्चयेन संस्कृतस्य हानि: स्यात् । मुद्रणव्यवस्थाया: आरम्भत: पूर्वं जगति षट्सहस्राधिका: भाषा:

आसन् । बह्वीभि: भाषाभि: मुद्रणव्यवस्थाया: अनुगुणम् आत्मा न सज्जीकृतः । तस्मात् त्रिसहस्राधिका: भाषा: गतप्राणा: जाता: ।

अद्यत्वे सङ्गणकं (Computer) चलदूरवाणी (Mobile) इत्यादीनाम् उपयोग: अधिक: । एकैकस्मिन् अपि यन्त्रप्रकारे उपयोगविधा: बहव: । तासु सर्वासु अपि विधासु संस्कृतस्य प्रयोग: यथा भवेत् तथा उपाया: चिन्तनीया: अस्माभि: । अत्र यदि वयम् आत्मन: सज्जतां न चिन्तयेम तर्हि हानि: भवेत् संस्कृतस्य एव ।

सङ्गणकक्षेत्रे अक्षरसंयोजनादिषु विविधै: जनै: विविधा: तन्त्रांशाः (Software) अक्षरविन्यासा: (Font) च उपयुज्यन्ते । तस्मात् एकेन सज्जीकृता सञ्चिका (File) अन्येन उपयोक्तुं न शक्यते । यावत् अत्र एकरूपता न चिन्त्येत तावत् एतादृशीनां समस्यानां परिहार: न भवेत् । एवमेव यन्त्रानुवादविषये विविधानाम् ‘एप्लिकेशन्स्’-उपयोगविषये च उपाया: चिन्तनीया: । सरलमानकसंस्कृतम् अवलम्ब्य एतत्सर्वं चिन्तितं चेत् एकरूपता, उपयोगसारल्यं च स्यात् । एकैकेनापि विशेषज्ञेन स्वमत्यनुगुणम् एकैकविधा व्यवस्था उपकल्प्येत चेत् पुनरपि एकरूपताभावसमस्या उद्भवेत् । अत: मानकम् अवलम्ब्य एव सर्वविधा: प्रयासा: यथा प्रचलेयु: तथा जागरूकता वोढव्या ।

### **३.३.७. जालपुटव्यवस्थाया: (Internet) अभ्युपगमस्य विषये**

अद्यत्वे जालपुटस्य प्रसार: उपयोग: च दिने दिने वर्धमान: अस्ति । नूतना: विनूतना: आविष्कारा: जायमाना: सन्ति । एतेषु प्रक्रमेषु या भाषा आत्मानं न प्रवर्तयेत् तस्या: दुर्गति: अवश्यमेव स्यात् । स्वस्य सर्वतोमुखविकासं साधयता संस्कृतेनापि एतद्विषये अवधातव्यं विशेषत: । भाविजनता एतादृशीनां व्यवस्थानाम् उपयोगे बद्धादरतां दर्शयति इत्यत:, एतादृशी: व्यवस्था: विना दैनन्दिनं जीवनं चालयितुं न शक्नुयात् इत्यत: च एतदानुगुण्येन चिन्तनम् अवश्यमेव करणीयं संस्कृतक्षेत्रेण अपि । एतस्मिन् अपि क्षेत्रे मानकम् अवलम्ब्य एव कार्यं कृतं चेत् साफल्यम् अधिकम् इति पुनर्वक्तव्यं नास्ति ननु ?

### **३.२. क्रियान्वयनाय केचन उपायाः**

एवं विविधेषु क्षेत्रेषु सरलमानकसंस्कृतस्य क्रियान्वयनाय अधोनिर्दिष्टा: केचन उपाया: अनुसर्तुं शक्या: -

- सरलमानकसंस्कृतसम्बद्धान् अंशान् समायोज्य, आवश्यकतां सुष्ठु प्रतिपाद्य लघुपुस्तकं प्रकाशनीयम् ।
- एतत् अधिकृत्य सङ्गोष्ठ्य: आयोजनीया: । तासु एतद्विषये चर्चा, व्यवहारपथं प्रति आनयनविषये योजना: च भवेयु: ।
- सरलसंस्कृतेन लेखनम् इच्छामात्रेण न भवति । विद्वांस: अपि अकृताभ्यासा: सरलमानकसंस्कृतेन लेखितुम् अर्हेयु: । अत: एतादृशलेकनाभ्यासाय कार्यशाला: आयोजनीया: ।
- सरलमानकसंस्कृतेन लिखिता: कृतय: प्रकाशनीया: ।

- सरलमानकसंस्कृतोपनिबद्धानां शिक्षणसामग्रीणां निर्माणं महता प्रमाणेन स्यात् । रघुवंशशाकुन्तलादीनां वस्तु सरलसंस्कृतेन लिखितं स्यात् ।
- विज्ञानगणितादिसम्बद्धानि पाठ्यपुस्तकानि प्राथमिकस्तरीयाणि माध्यमिकस्तरीयाणि च सरलमानक-संस्कृतेन अनुवक्तव्यानि, नूतनतया सज्जीकरणीयानि वा । तादृशानां पुस्तकानाम् उपयोगे आसक्ता: विद्यालया: तु बहव: सन्ति । पाठ्यसामग्रीणाम् एव अभाव: विशेषत: ।
- शिक्षाशास्त्रपाठ्यक्रमे 'सरलमानकसंस्कृतम्' इति विषय: कश्चन पाठ्यांश: स्यात् । छात्राध्यापका: सरलमानकसंस्कृतेन लेखनाय प्रशिक्षणं प्राप्नुयु: । बोधनकौशलमपि आत्मसात्कुर्यु: । शिक्षाशास्त्रसम्बद्धा: ग्रन्था: अपि सरलमानकसंस्कृतेन एव लिखिता: भवेयु: ।
- शास्त्रिप्रभृतिषु कक्ष्यासु अपि सरलमानकसंस्कृतं, तस्य आवश्यकता, प्रयोगकौशलम् इत्यादय: पाठ्यत्वेन अन्तर्भवेयु: ।
- सेवानिरतानां कृते सेवान्तर्गतप्रशिक्षणं व्यवस्थाप्यते । क्वचित् पुनश्चर्यापाठ्यक्रमकार्यक्रमाः आयोज्यन्ते । एतादृशेषु सर्वविधप्रशिक्षणेषु सरलमानकसंस्कृतम् अध्ययनविषय: स्यात् ।
- विद्यावारिधि: (पि.एच्.डी.) विशिष्टाचार्य: (एम्.फिल्) इत्यादीनां पाठ्यचर्याप्रशिक्षणावसरे सरलमानक-संस्कृतस्यापि अन्तर्भाव: चिन्तनीय: ।
- शोधप्रबन्ध: (Phd Thesis) सरलमानकसंस्कृतेन स्यात् इति विश्वविद्यालयानुदानयोग: (यु.जि.सि.) आदेशं प्रसारयेत् ।
- पाठ्यपुस्तकानां निर्माणे (विशेषत: प्राथमिक/माध्यमिकस्तरे) सरलमानकसंस्कृतस्य अनुसरणं चिन्तनीयम् ।
- शास्त्री, आचार्य: इत्यादिषु कक्ष्यासु सरलमानकसंस्कृतेन रचिता: ग्रन्था: अविस्तरपाठ्यपुस्तकत्वेन (Non detail Text) नियुज्येरन् ।
- शिक्षकनियुक्तिनिमित्तं सरलमानकसंस्कृतेन अभिव्यक्ते: (सम्भाषणस्य, लेखनस्य च) अनिवार्यता कल्पनीया । (विज्ञापिकादानावसरे एव अयम् अंश: स्पष्टीकरणीय: ।)
- संस्कृतविश्वविद्यालयानां, संस्कृतकार्यालयानां, संस्कृतविद्यालयमहाविद्यालयानां च सर्वे आन्तरिका: व्यवहारा:, अन्यै: सह जायमाना: व्यवहारा: च सरलमानकसंस्कृतेन एव स्यु: ।

  एतदर्थं यत् प्रशिक्षणम् आवश्यकं स्यात् तस्य दानाय व्यवस्था करणीया । अपेक्षिता: सामग्र्य: सज्जीकरणीया: । पत्रलेखनादीनां प्रारूपं निश्चित्य कर्मचारिभ्य: देयम् ।
- संस्कृतविश्वविद्यालयानां संस्कृतसम्बद्धानां सर्वासां संस्थानां च सर्वा: गतिविधय: (कार्यशाला:, व्याख्यानानि, प्रकाशनानि इत्यादीनि) सरलमानकसंस्कृतेन भवेयु: ।

- आकाशवाणी-दूरदर्शनादीनां वार्ता: संस्कृतकार्यक्रमा: च सरलमानकसंस्कृतेन भवेयु: ।
- राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) यदा संस्कृतविश्वविद्यालयेभ्य: मान्यता दीयेत तदवसरे सरलमानकसंस्कृतस्य क्रियान्वयनं कियता प्रमाणेन कृतम् इत्ययम् अंश: अपि परिशीलनीय: परिगणनीय: च ।
- विकिपीडियायोजनायां छात्रा: अध्यापका: च योजिता: चेत् सरलमानकसंस्कृतस्य अभ्यास: भवितुम् अर्हति । अत: एतदर्थं मार्ग: चिन्तनीय: ।
- तन्त्रज्ञानस्य अन्वयस्य (Technology Adaption) निमित्तं किं किं कर्तुं शक्यते इति चिन्तनीयम् । तदर्थं विस्तृता योजना रचनीया । तस्या: योजनाया: अन्वयनाय व्यवस्था अपि चिन्तनीया ।
- तत्तद्भाषासु प्रयुज्यमानानां तत्समतद्भावशब्दानाम् आवलिः निर्मातव्या । तत्र प्रयुज्यमानानां तेषां वास्तविकः अर्थः संस्कृतभाषायां कः, तत्र कस्मिन्नर्थे प्रयुज्यते, तादृशानां मानकससंस्कृते स्वीकारः कथं भवेत् इत्यादीनां चिन्तनार्थमपि कार्यशालाः आयोजनीयाः ।
- सरलमानकसंस्कृतेन सज्जीकृतानां कृतीनां समीक्षणं भवेत् । तत्र -
  - केषां पदानां प्रयोगप्राचुर्यं दृश्यते ?
  - उत्तमा: प्रयोगा: के ?
  - अपप्रयोगा: के ?
  - वाचोयुक्तिसमेता: प्रयोगा: (ईडियोमेटिक्) के ?

  इत्यादीनां विश्लेषणं भवेत् ।*

  अतः शोधविषयत्वेन एतासां कृतीनां समीक्षणस्य स्वीकाराय शोधार्थिनः प्रेरणीयाः ।
- संस्कृतत्वोपेता: प्राचीना: प्रयोगा: विविधेषु ग्रन्थेषु उपलभ्यन्ते । तेषां सङ्ग्रह: कार्यशालादिद्वारा चिन्तनीया: । प्राचीनै: प्रयुक्ता: अद्यतने व्यवहारे उपयोक्तुं योग्या: शब्दा: अपि एतादृशात् अध्ययनात् प्राप्तुं शक्या: ।
- क्रियाणां वस्तूनां च सूक्ष्मा: भेदा: आयुर्वेदग्रन्थादिषु बहुधा उपलभ्यन्ते । कृष्यादिषु उपयुक्ता: शब्दा: अपि तत्र उपलभ्यन्ते । एतादृशानां सङ्ग्रहात् अद्यतनीयं संस्कृतव्यवहारक्षेत्रं सुसमृद्धं भवेत् ।
- आधुनिकशब्दनिर्माणम् अपि सरलमानकसंस्कृतस्य किञ्चन अङ्गम् । आधुनिकशब्दनिर्माणावसरे अवधातव्यानाम् अंशानां निश्चय: स्यात् । तन्नियमानुगुणमेव शब्दा: निर्मातव्या:, अन्यै: निर्मिता: शब्दा: अङ्गीकरणीया: वा । प्राचीनसाहित्यपरिशीलनात् अपि असङ्ख्या: व्यावहारिका: शब्दा: प्राप्तुं शक्या: । एतत्सर्वं कर्तुं 'शब्दशाला' (Word Bank) इति योजना आरब्धुं शक्या । अस्या: मार्गदर्शकसमितौ समग्रस्य देशस्य विदुषां प्रातिनिध्यं स्यात् ।
- भारतशासनेन परिगणिताः राज्यभाषाः हिन्दी तेलुगु इत्यादयः याः भारतीयानां मातृभाषारूपेण सन्ति । इदानीं यः कोऽपि संस्कृते भाषितुमिच्छति, सः प्रथमं वक्तव्यं स्वमातृभाषया चिन्तयति । ततः तत् संस्कृतेन प्रकाशयति

इति सर्वविदितोऽयं विषयः । अतः तत्तद्भाषासु सामान्यव्यवहारोपयुक्तपदावली या Basic Vocabalary नाम्ना अभिधीयते, तस्याः संस्कृतपर्यायपदनिर्माणम् आवश्यकम् । अतः तादृशाः कोशाः निर्मातव्याः । तदर्थं तत्तद्राज्ये कार्यशालाः भवेयुः । मानकसंस्कृतम् आश्रित्य कोशनिर्माणाय विद्वत्समितिः तत्तद्राज्ये पृथक पृथक् रचनीया । इदं च कार्यं सपदि स्वीकरणीयम् । तत्र संस्कृतपर्यायचिन्तने पूर्वोक्तनियमाः अवश्यम् अनुसरणीयाः ।

मातृभाषया एव सर्वे शासकीयव्यवहारा: स्यु: इति इच्छन्ति राज्यसर्वकारा: । तदर्थं प्रयास: अपि निरन्तरं प्रचलति । तथापि अपेक्षितप्रमाणेन फलं न प्राप्यते । किमर्थम् एवं भवति ? तत्र मुख्यं कारणं तु - एतदर्थम् अपेक्षिता पदावली शैली च न निश्चिता इत्येतदेव ।

1949 तमे वर्षे 'संस्कृतं भारतसङ्घस्य राजभाषा भवेत्' (Sanskrit should be the officiallanguage of the Indian Union) इति डा.अम्बेडकर: प्रतिपादितवान् । किन्तु तत् अङ्गीकृतं भवेत् इत्यत्र संस्कृतज्ञानामेव आत्मविश्वास: न आसीत् ।

उत्तराखण्डे संस्कृतं द्वितीयराजभाषात्वेन स्यात् इति निर्णय: कृत: । किन्तु अस्य क्रियान्वयने प्रगति: तु अत्यल्पा । 'अधिकारिण: अनासक्ता:' इति तु सामान्यं कारणम् । यावत् शासनस्य सर्वेषु स्तरेषु सरलमानक-संस्कृतस्य परिचय: न भवेत् तावत् अधिकारिण: जना: वा संस्कृतव्यवहारे आसक्तिं न दर्शयेयु: । इदानीं या शैली आश्रीयते सा तु उपयोगाय न स्यात् ।

यदि सरलमानकसंस्कृतं व्यापकतया व्यवहारे भवेत् तर्हि संस्कृतसम्बद्धे व्यवहारक्षेत्रे, शिक्षणक्षेत्रे, साहित्यक्षेत्रे, प्राशासनिकक्षेत्रे च महत् परिवर्तनं भवेत् । महता प्रमाणेन सामान्यजनसमर्थनमपि प्राप्येत । जनता अपि नितराम् उपकृता भवेत् । संस्कृतक्षेत्रे जायमाना प्रगति: सर्वासां भारतीयभाषाणां, भारतीयसंस्कृते: च प्रगते: कारणं स्यात् ।

* * *